# ५. पञ्चमोध्यायः (प्रकरणत्रयस्यफलादिकथनम्)

(१) प्रकरणत्रयस्यनिरूपणम् ।

(१) षडवर्गफलम्

(२) होराशास्त्रे कर्मविपाकादि फलम्

(३) संचित कर्मफलम् (मेषादि लग्नानाम्)

**पंचमोध्याय:**

**भगवन्देवदेवेश लोकानां हितकारक:।**

**चिन्हज्ञानंदिनानाथ वदमच यथालयम् ।। १ ।।**

हे भगवन्, हे देवेश, हे लोकहितकारक, हे दीनानाथ लग्नादिभावनां संस्कारणं में कथय।

**श्री सूर्योवाच,**

**वैनतेयमहाभाग श्रृणुचैकमनानघ।।**

**ग्रहैचिन्हान्यनेकानि देहिनांवदतोहिमे।। २।।**

हे भगवन्, हे देवेश, हे लोकहितकारक, हे दीनानाथ लग्नादिभावनां संस्कारणं में कथय।

**लग्नात्षड्वर्गतोनाथ वदचिन्हान्यनेकश:।।**

**तानि सर्वान्यनेकानिदैवज्ञै: संप्रकाश्यते।। ३।।**

षड्वर्गस्य लग्नेन अनेकानि चिन्हानि उक्तानि तेषां सर्वेषां नामानि अनेक प्रकारै: दैवेज्ञै: प्रकाशितानि।

**लग्नेनूनं चिन्तये देहभावं होरायां वै संपदाद्यासुखंच।।**

**द्रेष्काण्णांता वन्धुसौख्यं विचिन्त्य सप्तांशे वै संतती सौख्यमार्यै:।। ४।।**

लग्ने देहभावस्य होराया: सम्पत्ते: तथा सुखस्य द्रेष्काणेन वंधुवान्धवादिनां सौख्यता तथा सप्तमांशेन सन्तति सुखस्य चिन्तनम् भवति।

**नवमांशलग्नाच्च कलत्रसौख्यं विलोक्यमानं रभोचत पित्रो:।**

**त्रिशांसभाद्रिष्टफलंविलोक्य सर्वविलग्नाच्च वदेत ग्रहज्ञै:।। ५।।**

नवमांशेन तथा लग्नेन कलत्र सौख्यं तथा त्रिंशांशेन इष्टफल सिद्धि विलोकनम् दैवज्ञै: कर्तव्यम्।

**लग्नमात ग्रहज्ञेन स्पष्टं कार्य ग्रहास्तत:।।**

**ब्रह्म सिद्धांतत: सम्यक् चिन्हानि च वदेत्तत:।। ६।।**

दैवज्ञद्वारा स्पष्टलग्न एवं स्पष्ट ग्रह आदि करणेन ब्रह्मसिद्धानुसारेण सम्यक् चिन्हानि वक्तव्यानि।

**लग्नमाने द्विभिर्भक्ते होरागमादिशेत्र।।**

**पूर्वार्धे चरवे होरा विषमें शशिनः समैः ।।७।।**

लग्नमान द्विभिर्भक्त प्राप्त शेषः होरा जायते। पूर्वार्धे रवेः भवेत् यदा विषमः तथा समराशिषु पूर्वार्ध चन्द्रस्य होराभवेत (अर्थात समराशिषु उत्तरार्ध रवेः तथा विषमराशिषु उत्तरार्ध चन्द्रस्य होरा भवति)

**समे लग्ननिशःशस्य पूर्वभानोः परायताः ।।**
**ग्रहश्चैव प्रदेदाच्च विचार्य गणकोतमैः ।। ८ ।।**

समलग्नेषु चन्द्रस्य पूर्व होरा एवं उत्तरार्ध सूर्यस्य होरा ज्ञातव्यम् गणकैः अनेनाधारेण ग्रहाणां विषये विचारणीयम्।

**होरानाथो यदाभानु बाल्ये दुःखी भवेन्नरः ।।**
**मध्येच समताज्ञेया वार्धिक्येरबलं धनम् ।। ९ ।।**

होरेश यदि सूर्यः भवेत् चेत् मनुष्यस्य वाल्यकालः दुखी युवावस्थायां सामान्यम् तथा वृद्धावस्थायां धनहीनता ज्ञेया।

**पितुर्निधनकालेच धनंक्षीणं भवेनृणाम् ।।**
**वाल्येतस्यपितृर्नाशो मातरं जीवितां वदेत् ।।१० ।।**

पितुः निधनेन धननाशः भवति। वाल्यावास्थायां एवं तस्य पितुर्नाश भवति किन्तु माता जीविता ज्ञेया।

**निज भुजार्जिता लक्ष्मी ग्रहैतिष्ठिति सर्वदा।**
**सेवया कष्ट वृत्यावा भिक्षतः क्रयतः रूषेः ।।११ ।।**

स्ववाहु प्रयत्नेन धनोपार्जनम् ग्रहानुकुलतायां भवति। ग्रहप्रतिकुल अवस्थायां तु सेवावृत्या कष्टेन वा भिक्षया निर्वाहं भवति।

**होरायतिर्यदा चंद्रो बाल्येस्यात बहुलंधनम्।**
**मध्ये धनंसमंज्ञेयं वार्धिकविधनोनरः ।।१२ ।।**

होरेशयदा चन्द्रभवेत् चेत् वाल्यवस्थायां विपुलं धनं भवति, मध्ये अर्थात युवावस्थायां सामान्यं धनम् तथा वार्धक्ये निर्धनी भवति।

**पृच्छकस्य दिशेतेज्ञैः पितुर्नाशैधनंबहु ।।**
**गृहंधनं समायुक्तं पित्रपैतामहार्जितम् ।।१३ ।।**

एतादृशाणां जातकानां पितुर्नाशात्पूर्वं पूर्वजानां अर्जितम् गृहेण सह बहुधनप्राप्तिः भवति।

पितुर्नाशात्पर प्रोक्त धनहानि महाव्यथा।।

**राजतो चौरतो वापि जलाग्निर्व्यसनादिभिः।।१४।।**

राजतः चौरतः वा जलाग्नी, व्यसनादि कोऽपि कारणेन धनहानि, महाव्यथा च जायते पितुर्नाश पश्चात्।

**होरेशो खलुदुष्ट खेचरयुतो वक्रान्वितोवा भवेत्।**

**प्रष्टुर्वक्ततरे च नेत्रयुगले वक्रे च वक्रं भवेत्।।१५।।**

**(होरेशो यदि भास्करो शशि युतो निजि ।**

**चन्हौरिक लग्नायो श्र भयतु स्पु र्वक्तदंताधरं।।15।।)**

होरेशः दुष्टग्रह युतः वा वक्री भवेत् चेत जातकस्य नेत्रेहानि वा पीड़ा भवेत् तथा वक्रगत्यां सर्वकार्याणा वक्राणि भवति।

**इति होराफलं**

**अथद्रेष्काणफलम्**

**।। श्री गणेशाय नमः।।**

**लग्नेभागं त्रिधायुक्तं कुर्यात् द्रेष्काण निश्चितम्।**

**प्रथमेतच्च द्वितिये पञ्चमे तृतीये क भम ...... ।।१।।**

लग्नस्य त्रिधाभागं करणे द्रेष्काणस्य निश्चयं भवति प्रथमभागे चेत् तेनैव, द्वितीय भागं भवेत् चेत् पञ्चमतः तथा तृतीय भागं भवेत् चेत् नवमतः गणना करणीया।

**एवं ग्रहाच्च संसाध्य प्रथमपंचनवांतिका**

**स्वस्थानाच्च समाज्ञेया तत्रस्थं फलमादिशेत्।।२।।**

एवमेव प्रथमपञ्चमनवमतः त्रीभागानां गणना ग्रहस्थानात् कृत्वा ग्रहाणां द्रेष्काण सिद्धिःभवति, तेनैव द्रेष्काणास्य फलादेशः भवति।

**द्रेष्काणस्यपतिर्यत्र लग्नेभवति चारूणा ।**

**तंल्लग्नांकमानतो वाच्या पृच्छकस्यसहोदराः ।।३।।**

द्रेष्काणस्य लग्नेशः लग्नकुण्डल्यां यस्यां राश्यां भवेत् तद् राश्यांक अनुसारेण पृच्द्कस्य सहोदराः ज्ञेया।

**यावन्मतैः खलैर्युक्तो बंधुतावन्मितामृता ।।**

**वदेद्वैर्युविदां सौम्यैर्युक्तस्तावन्मितोदयम् ।।४।।**

द्रेष्काणपतिः लग्न कुण्डल्यां यावन् पापग्रहैः युक्तः तावन् पृच्छकस्य वन्धु मृताः तथा यावन् शुभग्रहैः युक्तः तावन्मिताः वन्धुः जीविता।

**तत्पतिर्बलसम्पन्नो बलिभिः सहितोभवेत्।**
**बलाढ्याभ्रातर तस्यपराक्रमपरायणाः ।।५।।**

द्रेष्काणपतिः दिक् स्थानिकः यावन् वलवान् तावन् पृच्छकस्य भ्रातरः वलाख्या, पराक्रम परायणाः ज्ञेया।

**तत्पतिर्मित्र संयुक्तो मैत्र्यंबन्धुजनैर्वदेत।**
**शत्रुभिः सहित सख्यात बन्धुभिः सहशत्रुता।। ६ ।।**

द्रेष्काणपतिः यदि मित्र ग्रहैः सह संयुक्त चेत् पृच्छकस्य वन्धुजनैः सह मैत्रत्वम् वक्तव्यम्। यदि शत्रु ग्रहैः संयुक्त चेत् वन्धुभि सहः शत्रुताज्ञेया।

**पुंग्रहभ्रातरो ज्ञेयां यांवत्यचोत्यौ पृछकस्य च ।**
**भगिन्योयुवति खेटैरन्वितोलत्व ताविह ।।७।।**

संयुक्तग्रहेषु यावन् पुरूषग्रहाः तावन् भ्रातरः तथा यावन् स्त्रीग्रहाः तावन् मिताः पृच्छकस्य भगिम्या ज्ञेया।

**द्रेष्काणपतिर्यत्र षष्टाष्टम गृहंगत :।**
**आत्मधातो विनिर्देश्यो पृछकस्य मनीषिभिः।। ८ ।।**

द्रेष्काणपति यत्र षष्ट, अष्ट वा गृहे गतो भवेत् चेत् मनिषिभीः पृच्छकाय आत्माघात विनिदिर्ष्टय्वाम्।

**शत्रुक्षेत्रगतो वाथतत्पतिः शत्रुसंगतः ।**
**परतोपिमृतिः कष्टं पश्यंतोपि विनिर्दिशेत् ।।९।।**

द्रेष्काण पतिः यदि शत्रुक्षेत्रे गतो भवेत् वा शत्रु संगतः भवेत चेत् पृच्छकः परजनैः दत्तकष्टं मरणसदृशं द्रक्ष्यसि इति निर्दिष्टव्यम्।

**द्रेष्काणांगपति : शशांक सहित्रो लोमाकुलांगः सदा।**
**रूग्णांगोप्यथ वाचि भागरमणो चंद्रान्वितो स द्युतो।। १०।।**
**पृष्ठाकर्णगदी तथा खलयुतो द्रेश्काण नाथो मृतिः।**
**भचे वैर बंधुजनैद्य तत्रहि वदेत् संधौरिकेच्चारूणा ।। ११ ।।**
**द्रेष्काण नाथो मृतिभावसंस्थौ तमोर्नियुक्तोप्यपृछकस्य।**
**बंधोमृतिः पादय पालतोवामतिः स्वकीयाः प्रवदेत्तथासौ।।१२।।**

द्रेष्काण पतिः अष्टमभावे भवेत् वा पाप ग्रहैः युक्तः भवेत् तर्हि पृच्छकस्य वन्धोः मृति वा वन्धोः पालनं वाः सह तस्यगृहे भविष्यति इति स्वकीयमत्य वक्तव्यम्।

**द्रेष्काण चाष्टमभाव संस्थो गुरूशनिभ्यां सहितोथवास्यात्।**
**विषान्मृति मित्रसमाजगोष्ठ्यां मृति वदेद्र धृणिमृतिस्थौ ।।१३।।**

द्रेष्काणनाथः अष्ट भावे भावेत् वा शनि गुरूभ्यां सहितो भवेत् चेत् जातकस्य विषात् मृत्यु वा मित्र समाज गोष्ठ्याम् धृण्यां मृतिः भवति।

**यदि नभौमे मृतिमायातौ मृतिर्वदेविधूतप्राप्ततो वा।**
**यदात्रि भोरो रिपुभाव संस्थे चिन्हं वदेद्वामकरे पृष्टुः ।।१४।।**

यदि भूमिज अष्टमे सति तदा आयातौ इति अतिथिः मार्गौ मृतिः अथवा तापसन्तप्राः इति पृष्टुः वदेत्। यदा रिपुस्थाने स्यात् भौमः तदा वामकरे चिन्हं स्यादिति।

**तत्राष्टमोस्थो त्रिभवोपसब्ये करेणचिन्हं सुधिया हि वाच्यम्।**
**तल्लग्नयः शत्रुखगेणयुक्ता हि कान्मृतिस्तस्य तथा जनव्यः ।।१५।।**

तत्राऽपि अष्टमस्यो भौमः ही ग्रहयुक्तः तदा अपसव्ये हस्ते चिन्हं स्यात् इति वाच्य। द्रेष्काणलग्ने लग्नाधिपते यावन् शत्रुग्रहाः स्युः तावन् पृच्छकस्य जनन्यः मृताः इति सुधिया वाच्या।

**शुभे नयुक्तो यदिसाभिमानी दृढांगयुक्तो रवि वत्प्रतापि।**
**शुभाशुभं संतति जं तथा न्यज्ञानं श्रृणु स्वं गदतोममैव ।।१६।।**

द्रेष्काणलग्नः यदि शुभग्रहैः युक्तः भवेत् चेत् पृच्छकस्वाभिमानि दृडाङ्गयुक्तः एवं रविवत् प्रतापि भवति। मया शुभाशुभम् सन्ततिजं तथा अन्य ज्ञानं अदितम्, तत् श्रृणुः।

**इति द्रेष्काण फलम्।**

**अथसप्तमांशफलम्**

**श्रृणुसूतप्रवक्ष्यामि सप्तांशस्य विनिर्णयः ।**
**राशिमान नगैभक्तं लब्धं सप्तांशलग्नकम्।।१।।**

हे सूत सप्तमांशस्य विनिर्णयः प्रवक्षामी तत् श्रृणु राशिमानं सप्तसंख्यया

भक्तेसति सप्तमांश लग्नं प्राप्यते।

**विषमे स्वर्क्षतो ज्ञेया समये सप्तम राशितः।**

**तदंशाकं मितं लग्नं ज्ञेयमेव ग्रहास्तथा ।।२।।**

विषमराशिषु तयाराश्या एवं तथा समराशिषु सप्तमराशितः अंशादिनां गणना कृत्वा लग्नसिद्धं भवति तथा एवमेव ग्रहा अपि ज्ञेया।

**सप्तांशलग्ने विषमेपि राशि यदातदंगाद्दि गुणां लग्नम्।**

**सप्तांशभयं च भवतदीशः स सप्तमांशाधिपतिः प्रवच्यः।।३।।**

सप्तमांश लग्ने यदाविषम राशिःस्यात् तथा च लग्ने कर्क राशिः स्यात् अथवा सप्तमेशः लग्नेश स्यात् तदा सप्तम्भावः सुखकरः भवति। सप्तमांश लग्ने या राशि तस्याधिपः सप्तमांश प्रतिः प्रवच्य।

**राशि समेवापि नगांश लग्ने तत्सप्तमोगाद्विगुणां ल लग्नम्।**

**तद्राशिपोशैल लवस्थानाथे तत्संख्ययां संविवदे द्विदभिदिज्ञैः।। ४।।**

**यद्राशिगोसप्तमांगनाथोस्तदंक मानने वदेद्विशेषात्।**

**उत्पत्तिरेव किल संततीनां सप्तांशपोस्तोस्ति वधू च वंध्या।। ५।।**

सप्तमांशपतिः यस्यां राश्यां गतोभवेत् तह राश्यांक मान पृच्छकस्य सन्तति वक्तव्या। वधोः कुण्डली च दृष्टव्या।

**नीचगोनगलवांशयो भवेत् भकृतां दिशति संतति शाम् ।**

**वैरिवेश्मनिगतोथ संततिः शोभनाफि मरणयाकल्पते।। ६।।**

**मित्रभेय निजतुंग गोथवा मित्रसप्तनि च सप्तमस्थिते।**

**पृष्ठुरस्त्यथ भवेच्च सन्तती रूपधैर्य गुणं बाक्बिलासिनी ।।७।।**

सप्तमांश पतिः मित्रगृहे वा स्वच्चराश्यां वा मित्रसछ सप्तमस्थाने स्थितेसति पृष्टुः सन्तति रूप-धैर्य-गुणै-र्युक्ता, वाणिविलासिनी च भवति।

**सप्तांशयो भानुयुतो यदास्यात् नेत्रांग रोगातः नुलप्रवाच्या ।**

**सप्तांशानाथो लयतो यदिाफेसितांशु शुक्रौ भवति त्रकाणः।। ८।।**

सप्रमांश पतिः सूर्यसह भवेत् पृच्द्कस्य तनुजः नेत्ररोगी इति वक्तव्यः। सप्रमांश नाथः यदि चन्द्र सह भवेत् तर्हि पृच्द्कस्य सन्तति वीर्य हिना ज्ञेया।

**सप्तांशनाथौ गुरूशुक्रयतो यदाभवेत्यः विलग्नकाले।**

**आयुष्मती संतति रेववाच्या प्रक्षुः प्रजायुन्यति तदास्यात्।।९।।**

सप्तांशपतिः गुरू शुक्र युतो भवेत् तर्हि प्रश्नकाले पृच्छकस्य सन्ततिः अष्युष्मति तथा उन्नतिकारकः इति वक्तव्या।

**सप्तांशनाथो यदि सौम्ययुक्तो प्रष्टा विलग्ने विनतात्मजः स्यात्।**
**तदंक संख्यामितिपुत्र सौख्यं वदेतग्रहज्ञैरिहचात्मबुध्या ।।१०।।**

सप्तांशपतिः यदि वुधग्रहयुक्तः स्यात् तदा पृच्द्कस्य कन्यारत्नं वक्तव्यः। लग्नांक अनुसारं तस्य सन्तति ग्रहज्ञैः आत्मबुद्धया वक्तव्या।

**सप्तांशपक्रूर विचराख्यो लग्नेः स्थितः स्याभिधनं सुतानाम्।**
**शिरोतिः दगज एदचक्रे भवेन्मयोक्तं विधिवत खगेशः ।। ११ ।।**

सप्तांशपति यदि क्रूर भवेत् तथा चरलग्ने स्थितो भवेत् चेत् पृच्छकस्य सन्तति धनवान् इति वक्तवयम्।

**जयांशयः क्रूर खगाश्रितोवा मूर्तोभवेत संतति सौख्यमेति।**
**गर्भापिनास्त्येव नरस्यतस्य स्पप्नेपि नो पुत्र सौख्यं।। १२।।**

सप्तांशपतिः क्रूर ग्रहैः अश्रितः वा मृतावस्थायां भवेत् चेत् तस्मै नराय सन्तति सौख्यं गर्भाधाने वा स्वप्ने कदापि पुत्रसौख्यं नभविष्यति।

**भार्यानाथो लाभगोरिष्फगो वा शीर्षेजातौपादयोर्वायुपीडा।**
**क्रूराद्योयंदुष्टवक्षा सदैव सौम्यैयुक्ते सौम्यवक्षस्थलोयम् ।।१३।।**

सप्तांशः लाभस्थान वा रिष्फस्थानगतो भवेत् तर्हि पृच्छकस्य सन्तति। मस्तकपीड़ा, पाद पीडा वा वायुपीडया पिडितः भवति। सप्तांशपति यदि क्रूरः भवेत् चेत् सन्तानस्य वक्षस्थल दुष्टः किन्तु क्रुर सप्तांश पति अपि सौम्यग्रहैयुक्त स्यात तर्हि सन्तानस्य वक्षस्थलं सौम्यं ज्ञेयम्।

**जायानाथौ सप्तमेशौरि युक्तो प्रश्नकाले नास्ति सन्तान वृद्धिः।**
**अन्यागस्छो सौम्ययुक्तो यदास्यात् सौख्यंवाच्यं**
**तस्यसूतात्मजानाम्।।१४।।**

प्रश्नकाले सप्तमांश पति सप्तमस्थाने शनियुक्तः भवेत तर्हि सन्तानः वृद्धिः न इति ज्ञेया। यदि सप्तमांशपतिः अन्य स्थान गतोभवेत् तथा सौम्ययुक्तो भवेत् तदा पृच्छकस्य सूतात्मजानां सौछ्यं स्यादिति वाच्यम्।

**इति सप्तमांश फलम्**

## अथनवमांशफलम्

**वैनतेयमहाबाहोब्धेतलेकथितंमाया।**
**अत: परं प्रवक्ष्यामि नवांशस्यफलंयथा।। १ ।।**

हे वैनतेय मया एतद् (होरादि सप्तमांश पर्यन्तम्) ते कथितम् अत: परं नवमांश फलं प्रवक्ष्यामि।

**नवांशलग्नं नवमाविभक्तं लब्धं नवांशागमिहा विलग्नात्।**
**तदंगनाथं स नवमांशनाथ: प्रकल्पनीय: सुधियाविचार्य ।।२।।**

स्पष्टल्गनंनवेन भक्ते सति नवमांश लग्नं लभ्यते तथा तदंगनाथ: स: नवमांश नाथ: इति सुधिया विचार्य प्रकल्पनीय:।

**मेषनक्रतुलकीरकादयो राशय: क्रमतयो अजादय:।**
**तत्पतिस्त विगुणाद्यदैववित् देहिनां सुखमुथाच सुखं दिशेत्।। ३ ।।**

मेष, मकर: तुला, कर्क इत्यादि राशय: क्रमश: मेषादय: कथ्यते। अत: अन्यराशिनां गणना अजादि राशिभि: कर्तव्या। अनेन नवमांशेन देहिनां सुखादिनां निर्णयं भवति।

**नवांशनाथो यदि मूर्तिवर्ति प्रष्ठा विलग्ने खलु वाल्यभावे।**
**प्राप्नोतिरामामतुलङ्डुं तदास्यात्पापं विनाया समजाति रूत्थाम् ।। ४।।**

नवमांस नाथ: यदि विलग्ने लग्नास्थाने स्यात् तदा जातक: वाल्यावस्थायं अतुलं स्त्रीया प्राप्नोति। किन्तु समजाति स्तथत्वात् पापिया न भवति।

**षष्टाष्टमेवायदि प्रश्नकाले नवांशनाथस्य पातौयदास्यात् ।**
**क्रतोविवाहे पितायस... स्यात विवाहितमापिमतैव।।५।।**

प्रश्नकाले नवमांशनाथ: षष्ट वा अष्टमस्थाने गतो भवेत् चेत्।............

**यदा वरस्थो च नवमाशंनाथो भाग्याधिकां सफला भवेच्चकंन्याम्।**
**धनाश्रितो वा धनधान्ययुक्तां स्याद्वादसस्थे कुलरांचचौरा ।। 6 ।।**

नवमांशपति: वरस्थाने स्यात् तदा जातक: भाग्याधिकां कन्यां सफलतया धनधान्य युक्तां वा धनाश्रितो भूत्वा प्राप्नोति। यदि सप्तमांश पति: द्वादशेस्यात् तर्हि जातक: कुलरांच चौर: भवति।

**नवांशलग्नाथचेत् द्वादशेनी च वेश्मनी।**
**अति वाग् विरतां कन्यां नीचकर्मा मविस्तरा ।।७।।**

यदि नवमांशनाथः द्वादशे नीचाराश्याम् स्यात् तदा जातकः अतिवाग् विरतां विस्तारपूर्वकं नीचकर्माम् कन्यां प्राप्नोति।

**नवलवाधिपतिर्वान वनितात्मजास्त्रीनव लाभगतोपियदा भवेत्।**
**गुणवति स भवच्च पतिव्रतां सुतनयनीं मतिरूपवतीं सति।।८।।**

नवमांशपति यदि नवमेवा एकादशेस्थाने स्थितो भवेत् चेत् जातकस्य स्त्रीः वनितात्मजा -गुणवति-पतिव्रता-सुतनयनि अतिरूपवति च भवति।

**नवमांश नाथो यदि केन्द्रवर्ती स्यादोग्रह षोडशवर्षमध्ये।**
**प्रस्तुं वदत्यं च नवस्थितौ वा पाणिग्रहस्तत्व मितद्यपि ।।९।।**

नवमांशनाथो यदि केन्द्र वा नवमे स्यात् तर्हि जातकाय वक्तव्यंयत् तवविवाहः षोड्शवर्षपूर्वं भविष्यति।

**नवांशनाथोपि खलाखलायोः सुदुः खितास्तस्यनितविनीस्यात्।**
**दुवाकयवक्री खुटकेशयुक्ता क्रूराभदेवत् वारवधूसमाना।।१०।।**

तर्हि तस्यस्त्री सुदूःखिता -दुर्वाक्यवत्री -क्रूरा-खुटकेश युक्ता वारवधूसमाना ज्ञेया।

**नवांशयो सौम्ययुतोथ सौम्यो सौम्येक्षितो यस्य च प्रश्नकाले।**
**सुस्नेहयुक्ता सुभगाधच धारा चातुर्ययुक्तो मधुराननास्यात्।।११।।**

नवमांशपतिः स्वयं शुभग्रहः वा शुभग्रह युतो वा शुभग्रहस्य दृष्टयां स्यात् तदा जातकस्य पत्नी सुस्नेहयुक्ता -सुभगा-चातुर्ययुक्ता तथा मधुरानना ज्ञेया।

**नवांशनाथोयदि चाष्टमस्थो यस्यास्ति कांता निधनं स्वहस्तात्।**
**चंन्द्रान्वितः स्याच्वमृतांजलेश्रुहोरा विदाचात्र वदेन्नरस्य।।१२।।**

नवमांशपति यदि अष्टमभावे भवेत् चेत् तस्यपत्नी तस्यैव हस्तेन मरणं प्राप्स्यसि। यदि नवांशपः चन्द्रयुते अष्टमे चेत् तस्य जायां मृत्यु जलेन इति होराविदाः वराय वक्तव्यम्।

**नवांशलग्नात् रविसिंहकैयो षष्टस्थितौस्यातगरलेन नाशः।**
**काव्योच तस्मादिति जान्वितोयं सौम्ये क्षितेयुक्त मृतिच्चकष्टात्।।१३।।**

नवमांशलग्नात् षष्टेभावे सूर्यराहु भवेत् चेत् तस्य स्त्रीयनाशः (विषेन) भविष्यति। यदिषष्टस्थाने शुक्रभवेत चेत् तस्य जाया गंगाजलं प्राप्स्यति तथा

षष्टस्थाने बुधवा मंगल भवेत् तर्हि तस्य जायाया: मृत्यु अतिकष्टेन भविष्यति।

**नवांशपोश्चंद्रयुतोक्षितोवा जायाविलग्नस्यच प्रश्नकाले।**
**तदंगनाथस्य द्विभिचारयुक्ता स्ने हेन हीना कुटिलानना स्यात् ।।१४।।**

नवमांशपति: यदि चन्द्रवा भौमेन युक्तस्यात् तर्हि पृच्छकस्य पत्नी व्यभिचार युक्ता स्नेहहीना तथाकुटिलानना ज्ञेया।

**नवलवाधिपति यदि केंद्रगो खलुयुतोखलखेरविलोकित:।**
**हतमेतर्मरणं भुवि हंतित: परिकराज्यचदु: रव भरवधो ।।१५।।**
**नंदांशाधिपतिर्निजांग भवनेस्वोच्चेश्रु – गे स्थितौ ।**
**सौम्याढ्योपिच मित्र् युक् य भवेतस्त्रीणां सुखं संततम्।।**
**संतानासि समृधिरद्विमतुलां संभोग सौख्यं परं तुर्येनाथ।**
**नवांशपोयदिभवेत् जाया मृती कामत: ।।१६।।**

नवमांशाधिपति स्वराश्यां वा स्वच्चराश्यां भवेत् वा सौम्य ग्रहै: वा मित्रग्रहै: युतौ भवेत् तदा पृच्छकस्य स्त्रीणांसुखं संततम् भवति। सप्तमेस्थाने नवमांशाधिपति चेत् जातक: समृद्धियुक्त: अतुलंसम्भोग सौख्यं प्राप्नोति। यदि चतुर्थस्थाने नवमांशाधिपति भवेत चेत् जातकस्य जाया कामत: मरणं प्राप्नोति।

**इति नवांशफलम्**

## अथद्वादशांश फलम्

**लग्नमानं रविर्भक्तं लब्धंतद्विरसां शुभम्।**
**ग्रहाश्र्चैवसमासाध्यास्ततोरिष्ट: विनिर्णय: ।।१।।**
**प्रश्नांगं रविमानं रविर्भक्तं लब्धंतद्विरसांभश।**
**ग्रहाश्र्चैव समासाध्यास्ततोरिष्टविनिर्णय: ।। २।।**

प्रश्नलग्नं आदित्यसंख्यया भक्तेसति तत्तद्भागं तयाराश्या एव गणनाकृते सति द्वादशांसलग्न एवं ग्रहा: प्राप्यन्ते। तेन अरिष्टस्य विनिर्णय: भवति।

**द्वादशांशपतिर्मूर्तौ पृच्छ लग्ने गतोयदा।**
**जनकेन समोज्ञेयो गुणै:प्रष्ठा धनेनवा।। ३।।**

द्वादशांशपति: प्रश्नलग्ने प्रथमभावे स्यात् तदा जातक: गुण, प्रतिष्ठा वा धनेन तस्य जनकसमोज्ञेयो।

**रव्यांशपोद्विति प्रच्छौ प्रश्नकालेयदाभवेत्।**

**जनकाच्चधनाधिको वाच्योयं प्रश्नपारगैः ।। ४ ।।**

द्वादशांसपतिः द्वितीय भावे चेत् जातकः जनकादधिको धनिकः प्रश्नपारगैः वाच्यः ।

**रविलवाधिपतिःसहजस्थितोजनकतोधिककीर्तिरविंदसः ।**

**सुखांशगतः स्वपतिभवेत् अधिकभाग्यनिधिपातुरादिशेत् ।। ५ ।।**

द्वादशांशपतिः तृतीयस्थान चेत् जातकः जनकादधिक सूर्यसमान कीर्तिमान ज्ञेयो । यदि द्वादशांशपति चतुर्थे भवेत् चेत् जातकः जनकादधिक भाग्यवान् निधिवान् ज्ञेयो ।

**रविलवांशपतिर्यदिपंचमे भवतियस्य सभाग्यनिधिः सुधीः ।**

**स्वजनकस्य फलानिबहुन्यपि बहुविदा च दिशोन्मतकर्मजम् ।। ६ ।।**

द्वादशांशपतिः पञ्चमे गते सति जातक स्वजनकस्य बहुन्यपि फलानि सभाग्यनिधिं बहुविदा प्राप्नोति किन्तु स्वकर्मेण नः जनकस्य एव ।

**रिपुगतोरविरंसपतिभवेत् रिपुगणान्वित एव च तन्नरम् ।**

**रवि लवाधिपतिर्मदगो भवेत नृपाधनकीर्तिसमागम ।। ७ ।।**

षष्टस्थाने गते सति जातकः सदैव रिपुगणस्वित भवति यदि द्वादशांशपति भवेत् चेत् राज्ञैः सह
समागमत्वात् कीर्तिमान भवति ।

**मदनगोद्विरसांशपतिर्यदा नृपति पूज्यतनुर्यदिचाष्टमे ।**

**मरणमस्ति पातुः परतो ततोजलताडित गरलात्मविघातत‌ः ।। ८ ।।**

यदि द्वादशांशपति सप्तमे भवेत् चेत् जातकः अस्त्रतः जलतः वा ताड्नात् वा गरल इत्यादिभिः आत्मविघातनम् प्राप्नोति ।

**नवमगो दिननाथंलवाधिपो भवतियस्य जनस्यसुवाहनं ।**

**सकलतार्थ करोद्विजतर्यकोविविध धर्मधुरंधर एव सः ।। ९ ।।**

द्वादशांशपति नवमे गते सति जातकस्य सुवाहनं भवति तथा विविधप्रकारैः द्विजैसह तर्कः सकलज्ञानार्थकृत्वा धर्मधुरंधर भवति ।

**रविलवाधिपतिः किलकर्मगो भवति प्रश्नविधौ जननेथवा ।**

**पितृपितामहतोधिक भाग्यवान् स्वजननी जनकस्य सुखं लभेत ।।१० ।।**

जन्मलग्ने वा द्वादशां कुण्डल्यां दशमेस्थाने द्वादशांशपतिगतेसति जातकः

पितृपितामहत: अधिक भाग्यवान भवति। तथा स्वजननी जनकस्य च सुखं प्राप्नोति।

**आयगोरविलवाधियो यदासंवदेत् पितृधनं हिगुप्तकम्।**

**तत्पतिर्यदि च रिष्क गोथवा निंद्यकर्मनिरतोथकामुकः ।।११।।**

द्वदशांपति यदि एकादशेगतौ भवेत् चेत् पितृधनं तथा गुप्तधनं प्राप्नोति तथा द्वादशेगते सति निद्यकर्मरत: कामुको भवति।

**रविलवाधिपतिः खलखेचराः खलयुतोखलेगेहगतोथवा।**

**रिपुदृष्टि समन्वितो भवति नीचगतोस्तगतोथवा।। १२।।**

**दितिरिष्टगणं रिपुरोगतो ज्वलनतो पितृशानृपचौरतः।**

**धनपतिर्ग्रहगतो रवितो सदा मनसि पाप रविं विरतिं सुते।। १३।।**

द्वादशांपति खलग्रहैः युत वा खलगेहगतो वा रिपुदृष्टी समन्वितो वा नीचस्थानगतो भवेत् तर्हि जातकः रिपुगणतः रोगतः वा पितृतः नृपतः चौरतः ज्वलनशीलो भवति। द्वादशांश पति धनपतिर्ग्रह गतोभवेत् तर्हि मनसी पापं विरतिं प्राप्नोति।

**इति द्वादशंशफलम्**

**अथ त्रिशांशफलम्**

**त्रिशांशभावस्यफलं प्रवच्मियथोक्त मेतद्विधिनोपदिष्टम्।**

**तद्वैनतेय श्रृणुपत्रतोमे सतां नृपाणांप्रतितज्जयाय।।१।।**

हे वैनेतेय सतां नृपाणां प्रतितज्जयाय त्रिशांश भवास्य फलं प्रवच्मी, यदुक्तं विधिनोपदिष्टं तत् त्वम श्रृणु।

**कुजै निजीवाज्ञसिताः क्रमेण त्रिशांश नाथविषमेनिरूक्ताः।**

**पंचेषुनागाश्विशरैर्मितानां समेसितार्यारकल्पनीयम्।। २।।**

भौम-शनि-गुरू-बधु-शुक्र इतिक्रमेण त्रिशांश नाथाः क्रमेण विषमेउक्ताः तेषां आधिपत्यं क्रमेण

५-५-८-७-५ अंशः मितः ज्ञेयम्। तथा समारशिषु अनेनैव अंशमानेन शुक्र-बुध-

गुरू-शनि-भौम-त्रिशांश नाथाः उक्ता।

**त्रिंशांशयः क्रुरखगोहि नीचे भवेत्कुटुंबैः सहविरोधः।**

**सौम्यास्तदीशोयदिसौख्यशाली षष्टस्थितो राजनिबंधनंस्यतियात् ।। ३ ।।**

त्रिशांशाधिपतिः क्रूरग्रहभूत्वा नीचस्थाने गतोभवेत् चेत् पृच्छकस्य कुटुम्बेन सह विरोध ज्ञेयम्। तथा सौम्यग्रह भवेत् चेत् जातकसौख्यसाली ज्ञेयो। यदी षष्ठे भवेत् चेत् पृच्छकाय राजनि बंधनं भवति

**राजतोनिधनं वाच्यं स्व गुणां ज्ञयति मूर्तो।**

**द्वादशस्यो तदीशः स्यात् कष्टं राजगृहाद्वदेत।। ४।।**

त्रिशांशपति यदि लग्नेभवेत् चेत् स्वगुणास्यति राजतोनिधनं वाच्यमं। यद्रि द्वादशेचेत् राजगृहात् कष्टं वाच्यम्।

**शत्रुनाथे नसंतोषो राज्यो दैव चिदानृपात्।**

**अन्यत्रेषु च सर्वेषु सौख्य सौभाग्यमादिशेत।। ५।।**

त्रिशांशपतिः षष्ठे चेत् नृपात् असंन्तोष दैवविदा वाच्यं। त्रिशांशपतिः अन्यस्थाने स्थितेचेत् सौख्यं तथा सौभाग्यं देवविदा वाच्यम्।

**त्रिंशांसयोस्य मदनस्थितो वा समारमा दिशेद्वा।**

**ताभिः सुखं संततमत्रवाच्यं होराविदां शांतधियाविचार्या।। ६।।**

**त्रिशांसस्य फलं सम्यक् यथोक्तं कथितंमया।**

**यस्यविज्ञान मात्रेण नरोदुः खाद्विमुच्यते।। ७।।**

सम्यक् यस्य विज्ञानमात्रेण नारो दुःखात् विमूच्यते तादृशः त्रिशांशस्य सम्यक्फलम् मया कथितम्।

**येन कार्य वधप्रश्नमेतत् ते नाश्विदानंममकार्यमादौ।**

**कार्यं गृहीत्वा गणकाय दे नो चेद्दयातत्फलमादिशेत।। ८।।**

**पलैक निर्मिता मूर्ति ममसूत हिरण्मयी।**

**कर्मभिप्रच्छमंद द्यदैवज्ञाय विधानतः।। ९।।**

**नो चेत्कर्मणांसि धीर्वितथाविनतात्मज।**

**वित्त शाठ्यं न कुर्वीत दर्धार्ध प्रमादतः ।।१० ।।**

इति ज्ञान भास्करे षडवर्गफलंसंपूर्णम्।

**भाद्रपद्र शुक्ल 12 भृगुवासरे शके १८०५ संमत १९४० दिने रामचन्देण।**

अथहोरासारे कर्मविपाकादि फलम्

।। श्री राम समर्थः ।।

।। श्री गणेशाय: नमः ।।

अथहोरासारप्रारंभः

अरूणोवाच ।।

कुम्भलग्ने यदा प्रश्नः मूर्तौ भवति मंगलः ।।
द्वादशे यदि सूर्यस्यात् तत्कर्मकथयप्रभो ।। १ ।।

हे प्रभु कुम्भलग्ने यदा लग्नस्थाने मंगलः स्यात् तथा द्वादशे स्थाने सूर्यस्यात् तत्कर्म मे कथय।

श्री सूर्योवाच ।।

श्रृणोरूण प्रवक्ष्यामि होराद्रेष्काणप्रभावजम्।
तत्फलं कथयिश्यामि श्रृणुष्वैकाग्रमानसः ।। २ ।।

हे अरूण होरा द्रेष्काण प्रभावजं ततफलम् प्रवक्षामि तत् त्वम् एकाग्रमानसेन श्रृणुश्र्व।

कर्मस्थाने रविपुत्रो मूर्तो भवतिमंगलः ।
अहमेवद्वादशस्थे तदाकर्म द्वयंश्रुणु ।। ३ ।।

यदा कर्मस्थाने शनिलग्नभवे मंगल तथा द्वादशस्थाने सूर्यस्यात् तदाकर्मद्वयं श्रृणुः ।

सन्ताने च यदाराहु संतानं भौमपश्यति।
अपत्येच विलंवस्यात् गत्यवै श्रृष्णुकाइह ।। ४ ।।

सन्तानस्थाने राहुस्यात् तथा पञ्चमस्थानं भौमेन दृष्टं स्यात् तदा सन्तानप्राप्तौ विलम्बः भवति तदही श्रृणुः ।

**पल्लिका भूमिदेषेः च उत्पत्तिच्चंपकेपुरौ।**

**कौलवेपि कुले जन्म अवतारत्रयंस्मृतम्।।५।।**

पल्लिका भूमिदेशे चम्पकपुरौ कौलव कूले उत्पत्तिः (जन्मः) अवतार त्रयं स्मृतम्।

**ज्ञातव्यं सारथे तत्र लक्ष्मणैः सहं संयुतं।**

हे सारथे तत्र तत्र लक्षणैः सहसंयुतं ज्ञातव्यम्

**श्री सूर्यउवाच –**

**सारथेमदीयं वाक्यं श्रृणुष्वैकाग्रमानसः।। ६।।**

**हे सारथे मदीयं वाक्यम् एकाग्रमानसेन श्रृणुश्व।**

**मूर्तौ च यदि वक्रः स्यात् अग्निदाहः कलेवरो।**

**लोहघातः च विज्ञेया भिल्लिकाक्षैत्रमारिता।।७।।**

लग्नेयदि भौमः स्यात् तदा शरीरे अग्नीदाह लोहघात च विज्ञेया तथा भिल्लिका क्षेत्र मारिता ज्ञेया।

**उदकेमज्जनं चैव दाहस्तुहस्तपादयोः।**

**अंगे वायु कलत्रंच निधनं जेष्ठबांधवो।।८।।**

जलेमज्जनं हस्तपादयोः दाहः अंगे वायु तथा जेष्ठ वान्धव कलत्रस्य च निधनं ज्ञेयम्।

**सन्ताने च विलंब च प्रमेहे च कलत्रके।**

**दशधाजनित्रानीच कन्याराशेरपत्यानि।**

**गर्भपात द्वयं चैव मया च गदितंतदा।। ९।।**

सन्तान प्राप्तौ विलम्बः जायायां प्रमेहः तथा दशसंख्याकान् कन्यासन्तान तथा जायायाः वारद्वयं गर्भपातं गदितं मया।

**अरूण उवाच**

**तेषामन्यच दुःखानि सुखानि कथयप्रभो।**

**विस्तरेण समाख्याहि कर्मसाक्षी जगत्प्रभो।।१०।।**

हे कर्मशाक्षि हे जगत्प्रभो तेषां अन्य दुःखानि सुखानि च विस्तारेण मे कथय

**श्री सूर्यउवाच**

**श्रृणोरूण प्रवक्ष्यामि यस्मिन्कालेमृतानि च।**

**येन येन च दु:खेन तत्सर्बंच प्रकाश्यते।। ११।।**

हे अरूण येन-येन दु:खेन यस्मिन् काले मृता: तत्सर्वं मया प्रकाश्यते (प्रवक्ष्यामि) (तत्) श्रृणु।

**अपत्यं च द्वयं नष्टं शीतलादेवी रोगत:।**
**सा कन्या गर्भपात:स्यात् द्वितीयं जन्मएव च।। १२।।**

शीतलादेवी रोगत: यस्य अपत्य द्वयं नष्टं तस्या: द्वितीय जन्मे गर्भपातस्यात्।

**एकपुत्रेति सारेण मृत: शाकिनिनि दोषत:।**
**पुत्रद्वयं च वर्षाष्टौमृतं ते नैवकर्मणि।। १३।।**

शाकिनि दोषत: अतिसारेण यस्या: एकपुत्रं मृत:द्वितीयजन्मे तस्या: अष्टवर्षायु जीवित:। पुत्र द्वयं कर्मेणविना एवं मृतं स्यात्।

**एवं पुत्रद्वयंनष्टं कन्यापत्य त्रयं तथा।**
**भोमदृष्ट्या संदेहो गर्भपात द्वयं तथा।।१४।।**

एवंपुत्र सन्तान द्वयं तथा कन्यासन्तान त्रयम् नष्टम् तथा वारद्वयं गर्भपात, भौमदृष्टया सन्देहान्वित:।

**द्वादशसंख्याकान्येव अपत्याविविधानि च।**
**राहु दृष्टया मृतान्येव भौमदृष्टयातथैवच।।१५।।**

राहुदृष्टया भौमदृष्टया पृच्द्कस्य द्वादश संख्याकान् कन्या वा पुत्र अपत्यादि मृतानि ज्ञेयानि।

**भातृत्रयं च वक्तव्यं सहजे रवि तिष्ठति।**
**नामेन सहजं दृष्टं सहजा नाशनं भवेत।।१६।।**

यदि तृतीयस्थाने सूर्यस्यात् तर्हि भ्रातृत्रयं वक्तव्यम्। .....सहजस्थानं दृष्टं स्यात् तर्हि वान्धवानाम् नाश: ज्ञेय:।

**भगिनी द्वयं मृतं चैव गर्भपात द्वयं तथा।**
**सप्त जन्मनितस्यैव श्रृणुष्व च न संशय।।१७।।**

भगिनी द्वयं मृता ज्ञेया तथा गर्भपात वारद्वयं ज्ञेयो एवं एषा परिस्थिति सप्तजन्मपर्यन्तम् विनासंशयेन ज्ञेया।

**सहजस्थे यदा भौम राहुणा यदि संयुत:।**
**भ्रातरौ द्वौ विदेशे वै मृत्युंचैव न संशय:।।१८।।**

तृतीयस्थाने यदा भौम राहुणायुत: स्यात् तदा विनासंशयेन पृच्छकस्य भ्रातर

द्वयानां विदेशे मृत्युः ज्ञेया।

**जेष्ठस्य अपत्यानि त्रयोदशमितानि च।**

**अतिसारेण नष्टानि सूर्यस्यवचनानि च ।।१९।।**

सूर्यवचनानुसारेण जेष्ठ भ्रातरस्य त्रयोदशामितानि अपत्यानि अतिसारेण नष्टानि ज्ञेयानि।

**रोगनष्टानि सूर्यस्य वचनं जीवनानि च ।**

**यान्येव तेषां वैर...... पितरं नमन्ये पुत्र मातरंच नसंशय।।२०।।**

**एकपुत्रस्तु यार्गे च भगिन्या वैर मेव च।**

**पितृब्य पत्नी भुक्ता च यदींद्रियेनुभूमिजः।। २१।।**

**यदि सूर्यमहाराज प्रसंन्नो भक्त वत्सलः।**

**पत्नि पक्षे तु चिन्हं च कथयत्वं दिनेश्वरः।। २२।।**

अष्टमस्थाने शनिः भौमेन युतोस्यात् तर्हि पृच्छकस्य अतिसारेण तस्य पितुः शोकेनमरणं ज्ञेयम्।

**गुह्यस्थाने सूर्यपुत्रो भौमेन यदि संयुतः।**

**स एवमतिसारेण शोकेन मरणं पितुः।।२३।।**

सप्तमेस्थाने शनि भवमेनसह भवेत् तदा सह अतिसारेण शोकेन च पितुः मरणं ज्ञेयम्।

**कनिष्ठभ्रातृपुत्रस्य मृतपुत्र त्रयं तथा।**

**पुत्रद्वयं पौढतरं एकोबालस्थैवच ।।२४।।**

कनिष्ठ भ्रातुः पुत्रद्वयं पौढतरम् तथा एक पौत्र वाल्यवास्थायाम् अर्थात् पौत्रत्रयम् मृताज्ञेया।

**अरूणोवाच**

**यदि सूर्यमहाराज प्रसन्नो भक्त वत्सलः।**

**पत्नि पक्षेतु चिन्हं च कथयत्वम् दिनेश्वरः।। (२४) (१)**

हे सूर्य महाराज, हे भक्तवत्सल हे दिनेश्वर यदित्वं प्रशन्नः तर्हि पत्निपक्षस्य चिन्हं कथय।

**सूर्यउवाच**

**पत्न्योः सुखं च दुःखं च धनानां तथैव च।**

**ज्ञायते श्रुतिमात्रेण कथयामि श्रृणुष्तथा: ।।२५।।**

पत्न्यो: तथा बान्धवानां सुखं च दुखं श्रुतिमात्रेण ज्ञायेत तत् (अहं) कथयामि (ततसुखत्वम्) श्रृणुश्र्व।

**यदालग्ने शनिश्र्चैव भौमस्तु सप्तमेतथा।**
**भ्रातृस्थाने यदा राहु कुलच्छेदो भवेनृणाम्।।२६।।**

लग्नस्थाने शनि सप्तमेस्थाने भौम तथा तृतीयस्थाने राहु भवेत् चेत् तस्यनरस्य कुलच्छेदो ज्ञेयम्।

**सिंहिकेयस्य होरायां यदिप्रश्न क्रतो भवेत।**
**कर्माणि यदि भौमस्य बालकं वधितंपुरा।।२७।।**

प्रश्नकाले यदि लग्ने राहु भवेत् चेत् तथा दशमे राहु भवेत् चेत् जातकेन पूर्वकाले वालकं वधितं ज्ञेयम्।

**मारिताभ्रातरश्र्चैव पूर्व जन्मनि निश्र्चितम्।**
**क्षत्रीयप्रेरकश्र्चैव यवनोबुद्धिदातृक: ।।२८।।**

तेन जातकेन पूर्व जन्मनि यवनवुद्धि अनुसारेण क्षत्रीय प्रेरणया निश्चितरूपेण भ्रातरा मारिता ज्ञेया।

**भ्रातपत्नी वनिता च तस्या: पत्यातथैव च।**
**तेनकर्मविपाकेन मृतानि सकलान्यपि।। २९।।**

तेन जातकेन गत जन्में भ्रातपत्नी तथा भ्रातृ पुत्रान् मारिता अत: तेनकर्म विपाकेन अस्मिन् जन्मनि तस्य सकलानि मृतानि।

**द्रेष्काणे यदि भौमस्य अंशस्तद्वादशांकरा।**
**मूर्तौयदी भूमिपुत्र: कुलनाशश्र्च निश्र्चितम्।। ३०।।**

यदि द्वादश द्रेष्काण भौमस्य भवेत् तथा भौम लग्नस्थाने भवेत् तदा पृच्छकस्य निश्र्चयेन कुलनाशो ज्ञेयम्।

**भौमराहौ सम: सप्तौ परस्परं च पश्यति।**
**स्त्रीनाशोभवेतस्य ज्ञातव्यं कश्यपात्मज।।३१।।**

यदि भौमराहो सप्तमेभवेत् वा परस्परं पश्येत् तदा जातकस्य स्त्रीनाश: ज्योर्तिविदा ज्ञेया।

**श्री सूर्यउवाच**

**भौमहोरां यदाप्रश्नः देष्काणपति भूमिजः।**

**अपत्यभुवने पश्येत् वंध्याजन्मत्रयं तथा।।३२।।**

भौमस्य होरायां यदि प्रश्नः स्यात् तथा तस्मिन् काले द्रेष्काण पति भौमः पञ्चमस्थानं पश्येत् चेत् जातकस्य जन्मत्रयं वन्ध्या ज्ञेया।

**द्वादशे यदि भौच्च कर्मस्थाने रविर्भवेत्।**

**राहुणायदिनिरीक्षेत मारितं ब्राह्मणद्वयम्।।३३।।**

यदि द्वादशे भौमः तथा एकादशे रविर्भवेत् तथा राहोः दृष्टिभवेत् चेत् जातकेन गतजन्मे बाह्मण द्वयं मारितम् इति ज्ञेयम्।

**दक्षिणांङ्गेतथा पार्श्वे दारूघातोविधीयते।**

**जेष्ठश्चैवतुभ्रातृश्च लोहघातोदरेतथा।। ३३।। (३४)**

अस्मिन जन्मे दक्षिणांगे तथा पार्श्वे काष्टघात ज्ञेयम्। तथा जेष्ठभ्रातुः उदरे लोहघातं ज्ञेयम्।

**मातुः शरीरे घातश्च मात्रादग्धं गृहंतदा।**

**मातृत्रयं तदावाच्यं जानी हि कश्यपात्मज।।३४।।**

मातुः शरीरे घातः एवं तस्यगृहं दग्धं ज्ञेयम्। हे कश्यापात्मजः जातकस्य मातृत्रयं ज्ञेयम्।

**माताचैका मृताज्ञेया द्वितीया व्यभिचारिणी।**

**परपुंसागतान्यत्र नान्यथा मयिवा करूपतः।।३५।।**

एकामाता तस्य मृता ज्ञेया द्वितीया व्याभिचारिणी पर पुरूषगता वा वाक्यतः ज्ञेया।

**मातृभगिनी विषेणैव मृताक्रोधे पिता गृहे।**

**याऽजीवे साच दुःखार्ता ज्ञातव्यं गरूडानुजः।।३६।।**

तस्य मातृभगिनी पितागृहे एव क्रोधेन विषेण मृता ज्ञेया। हे गरूडानुज या माता जीविता सा दुःखार्ता ज्ञेया।

**इदं वाक्यमदीयं च चिन्हैश्च परिविस्तृतम्।**

**होरा द्रेष्काण भावेन ज्ञातव्यं च खगेश्वरः।। ३७।।**

हे खगेश्वर इदं मदीयं वाक्यं परिवृस्तृत चिन्हैः होरा द्रेष्काण भावेन ज्ञातव्यम्।

**मातापितृ विरूत्धंस्यात् भ्रातृवैरंपरस्परम्।**

**दुःखै नार्त कुटुंबेन कुटुंबमारणानृणाम्।। ३८।।**

जातकस्य माता पिता विरूद्धमतिनः एवं भातृणां परस्परम् वैरं ज्ञेयम्। येन कुटुम्बस्य मरणां दुःखेन आर्तेन च ज्ञेयम्।

**मातृणां दुर्गतीनांच दुःखितानि परस्परम्।**

**दारिद्राणि विशेषेण दुष्टकर्मेपिदेशतः।। ३९।।**

**भातृमारण तृतीयं मृतंपश्चदर्भगिनिद्वयं।**

**भगिन्येकाच बधिरा द्वितीयाखंजकातथा।। ४०।।**

**एकभागेनी वधिरा तथा द्वितीय खंजका ज्ञेया।**

**भ्रातशरीरे अर्षा गुप्तरोगो विधीयते।**

मुदावर्तं च पितृणां जानि हि कश्यपात्मज।। ४१।।

हे कस्यापात्मज भ्रातृशरीरे आर्षानामक गुप्तरोगो विधीयते तथा पितृणां मुदावर्त जानीहि।

**मातृदेहे शिरोवर्ति गुल्मोवै पितृणां तथा।**

**यच्चपश्याम्यहं मेव उदकेमज्जनं भवेत्।।४२।।**

जातकस्य मातृदेहे शिरोवर्ति एवं पितृदेहे गुल्मनामक रोग ज्ञेयः। तथा अहं यत् पश्यामि तदेवं यत् उदके मज्जनम् भवेत्।

**इदं चिन्हं सदाज्ञेयं पंडितैः शास्त्रकोविदैः।**

**चिन्हं द्वितीयं ज्ञातव्यं गर्भपातस्तु योषिते।। ४३।।**

**मासार्धं मासमेकं च सवति रूधिरं तदा।**

शास्त्रकोविदैः पण्डितै इदं चिन्हं सदा ज्ञेयम् यत् ज्ञातव्यं द्वितीयं चिन्हं तथा गर्भपात योषितः मासार्धं वा एक मास पर्यन्तम् रूधिरस्रावः ज्ञेयः।

**अरूणउवाच**

**स्वामिन् ग्रहादिदेवेश कृपांकुरूममोपरि।**

**होरा द्रेष्काण अंशस्य चिन्हं कथय मारिच।। ४५।।**

हे मारिच, हे स्वामिन, हे ग्रहादि देवेश, ममोपरि कृपां कुरू होरा द्रेष्काण अंशस्य चिन्हं कथय।

**श्री सूर्यउवाच**

**यदि पृच्छसिवक्षीत्वं चिन्हं जन्मसप्ताधिकम्।**

**तत्सर्वं कथइष्यामि जंतूनां च हिताय वै।। ४६।।**

यदि त्वं पृच्छसि तर्हि जन्म शताधिकं चिन्हं वक्षि, जन्तूनां हिताय तत्सर्वं कथयिश्यामि।

**मूर्तो यदि सुराचार्यो भृगुणासहतिष्ठती।**
**अवतारं त्रयं चैव विभजाती विधीयते।।४७।।**

लग्नेयदि शुक्रेण सह वृहस्पति भवेत् चेत् जातकस्य अवतार त्रयं विभजाति भविष्यति।

**लग्नाच्च सप्तमो भौमः राहुणा सहसंयुतः।**
**जन्मत्रयं अपत्नीकः जायते म्रियते पुनः।।४८।।**

यदि सप्तमेस्थाने भौमेनसह राहुः भवेत् चेत् जातकः जन्मत्रय पर्यन्तं अपत्नीकः जायते।

**पत्नीनां चतुष्टयं च त्रयपन्निं तु म्रीयते।**
**एका वंध्याच तत्रैव सन्तानंनकुले तथा।। ४९।।**

चतुर्थे जन्म जातकस्य पत्नीत्रयं मृताज्ञेया तथा चतुर्था वध्या पत्नी ज्ञेया किन्तु तस्यकुले सन्तानः न भविष्यति।

**भ्रातद्वयं च म्रियते भौमोयदि तृतीयगः।**
**राहुणा यदि युक्तश्चेत् मेल्छैः सह जनं भवेत्।।५०।।**

यदि भौमः तृतीयस्थाने गतो भवेत तर्हि जातकस्य भातृद्वयं मृताज्ञेया तथा यदि भौमः तृतीये राहुणा सह

भवेत् चेत् जातकस्य जीवनः म्लेच्छैः सह व्यतितः।

**म्लेच्छगामी म्लेच्छस्त्री च तस्यापत्यं मजायते।**
**सप्तजन्मनि म्लेछो वै मृतेम्लेछो भविष्यति।।५१।।**

स जातकः स्वयं म्लेच्छ गमी तथा तस्यस्त्री अपि म्लेच्छा ज्ञेया तथा तस्य अपत्यं न भविष्यति तथा अष्टजन्म पर्यन्तम् जातकः म्लेच्छ भविष्यति।

**भ्राता वा भ्रातृपुत्रोवा पिता पितृमहस्तथा।**
**सर्वेषां अवगतिः स्तत्र यदितिष्टति भूमिजः।।५२।।**

यदि भौमः तृतीय स्थाने गतो चेत् जातकस्य भ्राता, भ्रातापुत्रा, पिता, पितामहः वा सवैषां अवगति भवति।

**अपत्या वंशाहजं कुर्यात् जनितानि मृतानि वै।**

**उदके मज्जितान्येव पूर्वकर्मात्रभावता: ।। ५३ ।।**

**गुल्मरोगान्मृतान्यैव विस्फोटकस्तथैव च।**

**महत्कर्म कृतं तेन कृत्वामृतप्रजास्तथा ।। ५४ ।।**

जातकस्य प्रजा गुल्मरोगाद् वा विस्फोटक रोगात् मृताज्ञेया तथा जातकेन प्राजां जीवयितुंम महत कर्मं कृतं ज्ञेयम्।

**भ्रातृजायाभिगमने षढो भवति निश्चितम्।**

**मिथुने राशि तत्रैव तुलाराशिस्तथैव च।। ५५ ।।**

यदि तृतीय स्थाने भौम तुला वा मिथु राशिस्य भवेत् चेत् जातक: निश्चयेन भातृजाया भिगमने षंडो भवति।

**तुलाराशीमेषराशी राशी मिथुनमेवच।**

**त्रिभिमेलनं कृत्वा च पूर्वकर्म सुनिश्चितम्।। ५६ ।।**

तुलाराशि, मेष राशि तथा मिथुन राशि इति त्रिभि: मेलनं कृत्वा पूर्वकर्म निश्चितं भवति।

**कर्क राशिं च ये केन मारितं नकुलद्वयम्।**

**तेन कर्म विपाकेन मृतं बालचतुष्टम्।। ५७ ।।**

यदि कर्कराशि मध्य भवेत् चेत् जातकेन गतजन्मे नकुलद्वयं मारितं ज्ञेयं तेन कर्म विपाकेन जातकस्य बाल चतुष्टयं मृतं जेयम्।

**ये नैव कुत्शितंकर्म कृतं अन्येतथैव च।**

**उभाभ्यां तु मिलित्वा च निहतं ब्रह्मबालकम्।। ५८ ।।**

तेन जातकेन कुत्शितं कर्म तथा अन्येपि दुष्टकर्माणि कृतानि तेन फलेन तं ब्रह्मवाल हत्या फलं प्राप्तम्।

**यस्यपुत्रो तृतीयो वै व्याधिना सोपिम्रीयते।**

**एकाताति सारेण शाकिन्यादोषितस्तथा।। ५९ ।।**

यस्य तृतीय पुत्र: व्याधिना अप्रम्रियते एक: अतिसारेण तथा अन्या: शाकिनीदोषेण मृत्युं प्राप्स्यति।

**तुलाराशि चतुर्थस्य पञ्चमो अलिराशिक:।**

**मिलित्वा पंचभिर्बालै मारितं चार्धरात्रके ।। ६० ।।**

चतुर्थस्य तुलाराशि तथा अलिरशिके (वृश्चिक) पञ्चमे चेत् तदा तेन पञ्चभिर्वालै: सह मिलित्वा अर्धरात्रौ मरितम्।

**तुलाराशि भागिन्या च क्षिप्तं तत्र गृहांतरे।**

**तेनकर्मणिलोभेन हारकेणतथैव च।। ६१ ।।**

हरकेण लोभेन तुलाराशि भगिन्या सह गृहान्तरे क्षिप्तम्।

**अनयागृहीतं बालं वंचितं स्वधनंक्षणात्। ।६२।।**

**तथा तस्या बालं गृहितं तथा क्षणेनैव तत् धनं वञ्चितम्।।**

**तेनकर्म विपाकेन अस्या गर्भस्यपातनः।**

**लोहशस्त्रेण खनितं निक्षेपितगृहांतेर।।६३ ।।**

जातकेन लोहशस्त्रेण खननं कृत्वा गृहान्तरे तत्धनं निक्षेपितम् तेनकर्म विपाकेन गर्भपातः जातः।

**वृश्चिक राशीयोस्तु तस्यभार्यासुनिश्चिम्।**

**मारितं खिल्लिका युग्मं मृतापत्यं दरिद्रता। ६४।।**

यदि वृश्चिक राशि यस्य चेत् तेन निश्चित् रूपेण भार्याः कुक्षौ खिल्लिका द्वयं मारिता, तेन कर्म विपाकेन तस्यापत्य मृतःतथा दरिद्रता प्राप्ताः।

**खिलकाहनना चिन्हं शरीरेश्वेतकुष्टकम्।**

**हरिषे रोगतः पीडा जानी हि कश्यापत्मज।। ६५ ।।**

हे कश्यपात्मज खिल्लिका हननस्य चिन्हं शरीरे श्वेतकुष्ट रूपेण तथा हरिषे रोगतः पीडा त्वं जानिहि।

**भार्याभिश्चैव मारितं बालकं च तथैव च।**

**तेनकर्मविपाकेन वंध्या जन्मत्रयं तथा।।६६ ।।**

येन भार्याभिः सह वालकं मारितं तस्य जन्मत्रयम् कर्मविपाकेन वन्ध्याज्ञेयम्।

**पुत्रश्चैकोमृतोनद्यां मारितोदकमध्यके।**

**कन्याराशि मृतापत्यो गर्भपातद्वयं तथा।। ६७।।**

येन नद्यां जलमध्ये एकपुत्रः मारितः तस्य एक पुत्रः मृतः एवं गर्भपात द्वयं ज्ञेयम्।

**श्री सूर्यउवाच**

**परस्त्रीणां च गमनं ब्रह्मणीनां विशेषतः।**

**त्रिचतुः पंचसप्तानां कृतं जन्म चतुष्ट्यम्।। ६८ ।।**

येन जन्म चतुष्टये क्रमेण त्रय चत्वार पञ्च सप्त परस्त्रीणां तथा विशेष रूपेण ब्राह्मणिनां गमनं कृतम्।

**तेन कर्म विपाकेन मृतं भ्रातद्वयं तथा।**

**ब्राह्मणी गमने चैव मृतापत्यं चतुष्टयम्।। ६९।।**

तेन कर्मविपाकेन तस्य पञ्चजन्मे भ्रातृद्वयं मृतं तथा ब्राह्मणि गमनस्य विपाकेन अपत्य चतुष्टयं मृतम्।

**येकयाभार्ययाचैव द्वितीयेन प्रति वेश्मनः।**

**उभाभ्यां मेलने चैव व्याभिचाररतस्तथा।।७०।।**

येन एकस्मिन् जन्मनि भार्या द्वयं गृहे द्वयाभ्यां पालितः तथा व्यभिचाररतः जीवनं जीवितम्।

**कन्याराशि मृतः पुत्रः गर्भपात द्वयं तथा।**

**ज्ञातव्यं मारितो जंतु नद्या वा चांतरा।। ७१।।**

तस्य कर्मविपाकेन तस्य कन्याराशि पुत्रः मृतः तथा गर्भपातद्वयं जातम् तथा तेन नाद्यांवा इतरे जन्तुमारितम् इति ज्ञातव्यम्।

**पूर्वजन्मे निषादश्च मारितं बालकद्वयम्।**

**स्त्रियावै प्रेरितोजन्तुः ज्ञातव्यं कश्यापात्मज।। ७२।।**

पूर्व जन्मे यः निषाद भुत्वा बालकद्वयं मारितम् तथा स्त्रियप्रेरित जन्तु इति हे कश्यपात्मज त्वया ज्ञातव्यम्।

**जामाता सहितं कर्म यवनेन सहैव च।**

**भिल्लकस्तु तृतीयश्च नात्रकार्या विचारणा।। ७३।।**

जामता यवन तथा भिल्लकेन सह कर्मं कृतं चेत् विचारणा नैव कार्या।

**जामाताकुंभराशिसस्थो यस्यभार्यासहेवतु।**

**उभाभ्यां सहयोगंतु कृतं कर्म सुनिश्चितम्।। ७४।।**

कुम्भराशिस्य जामाता सह यस्य भार्यायाः संयोग चेत् उभाभ्यां सहयोगेन तेन सुनिश्चितम् कर्मं कृतम्।

**लोहकस्यकुशिप्राप्ता क्षैत्रारण्ये तथैवच।**

**स्वस्त्रिया खानितोगर्तः कुद्दालक सहैवतु।। ७५।।**

येन लोहकारस्य कुशिप्राप्त्वा अरण्येक्षेत्रे खनित्वा, गर्तः कृत्वा स्वस्त्रीया कुद्दालका।

**ब्राह्मणानां गृहं दग्धं तुलाराशि सहैव तु।**
**परस्त्री गमने चैव उभाभ्यां च तथैव च।। ७६।।**

येन तुलाराशि सह ब्राह्मणानां गृहं दग्धं तथा परस्त्रीगमनं अतः उभाभ्यां।

**तेनकर्म विपाकेन मृतास्त्री उभयोरपि।**
**दग्धहस्तद्वयं चैव कटि पृष्टेकलत्रयम्।। ७७।।**

तेनकर्म विपाकेन उभयो स्त्री मृता तथा हस्तद्वयं दग्धां कटिपृष्ठे तस्यभार्या।

**दुखं चरयतत्रैव नद्यां चैवतुमज्जनम्।**
**लोहकारण्यगमनं कुंभराशिस्तथैव च।। ७८।।**

दुःख चरयन् नद्यां मज्जिता लोहकारस्य कुम्भराशि सह अरण्ये गमनं जातम्।

लोहकारकजातीयाः गोरवर्णागमं कृतम्।

**जन्मत्रयं च संजातं भर्तृसौख्यंकदापि न।। ७९।।**

मया लोहकारादि जातिभिः गौरवर्ण प्रभावात् गमनं कृतं तस्याः जन्मत्रयं संजातः किन्तु भातृसौख्यं अप्राप्तः।

**जन्मांतरे सपत्नीच इह जन्मनि भोगिता।**
**अनयापतिना गर्भो कुंभराशिगताः स्वयम्।। ८०।।**

तस्याः चतुर्थे जन्मे सा पत्नीत्वेन पतिं भोगिता तथा अस्मिन् जन्मे कुम्भराशिगतः यः पुरूषः जन्मान्तरे आसीत् सः एव गर्भाधानं अकरोत्।

**लोहकारसुतावेयं व्यभिचारिणिनिश्चिता।**
**बहुनाभोगिताचैव अन्येनापिचभोगिता।। ८१।।**

लोहकारस्य सुता इयं निश्चितरूपेण व्याभिचारिणी ज्ञेया, तां कन्यां अन्येभिः बहुना भोगिता इति ज्ञेया।

**वणिकागमनाच्चैव पापजातंमहभूतम्।**
**तेनोपापेन तत्रैव कुटुंबस्यदरिद्रता।। ८२।।**

वणिकगमनात् महापापं जातम् तेन पापेन अस्मिन् जन्मनि एव तस्य कुटुम्बस्य दरिद्रता ज्ञेया।

**लग्नेशकर्मकर्ताच द्युनेशः प्रेरकोमतः।**
**बुद्धिदातामतः स्वामी सुकृतेशो निरीक्षकः।। ८३।।**
**तृतीयेशः – प्रोत्साह व्ययेशो वेतनप्रदः।**

**अरीशः सहचारी च सप्तैवं कर्मकारकाः ।। ८४ ।।**

लग्नेशः कर्मकर्ता, सप्तमेशः प्रेरक एवं बुद्धिदाता, भाग्येशः निरिक्षकः, तृतीयेशः प्रोत्साहकः, व्ययेशः वेतनदाता, षष्ठेशः सहचरी एवं सप्तकर्मकारकाः ज्ञेया।

**दशमालग्न पर्यन्तं ये खेटा ते प्रयोजकाः।**
**यद्यतभावगताः स्तेतु तत्समासुदश्र्चवता।। ८५ ।।**

दशमभावात् लग्नपर्यन्तं ये ग्रहाः भवन्ति ते ग्रहाः प्रयोजकाः इत्युच्यते। तथा ते प्रयोजकाः यह यह भाव गतास्युः तत् तद् भावानुसारं फलं दिशन्ति।

**विविधापत्य दुःखानि नानारोगैरलंकृता।**
**तज्जायापत्यचिन्हिानि तत्रभावं वदेत्रखगाः।। ८६ ।।**

विविध विपतयः दुःखानि नानारोगः तथा तत् जाया, अपत्य, इत्यादि अलंकृत चिन्हिानि तत्र भावगताः ग्रहाः दिशन्ति।

**पितृमातृसुहृद्भ्राता भगिनी मातुलात्मका।**
**पितृब्यादि श्यालांतं तज्जाया सुत संभवः।। ८७ ।।**
**पीडादुःखदेशादि मिथ्यालोकादिशंसनम्।**
**पितृव्यक्तादि तत्रं च प्रतिवेश्मादयः पुरा।।८८ ।।**
**शीर्षादी चरणपर्यन्तं देष्काणैः क्रूरसंयुतैः।**
**तद्तद्ग्रहकृताबाधा शरीरे चिन्हचिंयेत।। ८९ ।।**

पिता, माता, मित्र, भ्राता, भगिनी, मातुलः, पितृव्य इत्यादि श्यालान्ताः सम्बन्धः तथा जाया, सुतसंभव इत्यादिनां गणना, पिड़ादुःख, देश, लोकानां मिथ्याशंका तथा स्वगृह इत्यादि विचारः शीर्षादि चरणपर्यन्तं द्रेष्काणस्य क्रूरसंयुतैः ग्रहै तत् तद् ग्रहकृतावाधा तथा शरीरे चिन्हादिनां चिन्तनं भवति।

**प्रथमं च स्वभगिनी पितृष्वासा द्वितीयकम्।**
**तृतीयं सहजस्थानं मातृस्थानं चतुर्थकम् ।।९० ।।**
**पञ्चमं सुतभवनं दायादं षष्टमंतथा।**
**जायास्थानं सप्तमंच अष्टमंश्यालदेवरम्।। ९१ ।।**
**पितृव्यकादि नवमं दशमं पैतृकं तथा।**
**एकादशं भागिनेयं द्वादशं मातुलादिकं।।९२ ।।**

प्रथमात् स्वभनिनी, द्वितीयात् पितृष्वसा, तृतीयात् सहजादिनां, चतुर्थात् मातुः

पञ्चमात् सुतादिनां षष्ठ्मात् सप्तमात् जायाया:, अष्टमात् श्यालदेवरादिनां, नवमात् पितृव्यकादिनां,दशमात् पितु: एकदशात् भगिनेयादिनां तथा द्वादशात् मातुलादिनां चिन्तनं करणीयम्।

**श्री सूर्यउवाच**

**श्रृणोरूणप्रवक्ष्यामि स्वर्भगानिफलं तथा।**
**मूर्तौयदी भूमिपूत्रो भगिनी कर्मप्रेरक: ।।९३।।**

यदि भौम लग्नस्थाने चेत् तस्याभगिनी कर्मप्रेरका ज्ञेया।

**तयासहदुष्टकर्म कृंत तेन सुनिश्र्चितम्।**
**शनिना यदिपश्येत प्रेरकस्तु निषादक: ।।९४।।**

तया भगिन्यासह तेन निश्र्चित रूपेण दुष्टकर्म कृतं ज्ञेयम्। यदि भौम: शनिना दृष्ट: चेत् प्रेरक: निषादत:।

**रविद्वितीयभवने पितृष्वा सात्तथैवच।**
**पितृष्व सामीलइत्वा स्तेन: कर्मकृतं तथा।। ९५।।**

यदि द्वितीयस्थाने सूर्य: चेत् जातकेन पितृष्वसा सह मिलित्वा चौर कर्म कृतं ज्ञेयम्।

कर्मचतुर्विधंप्रोक्तं श्रृणुष्वरूणसारथे।
**भृत्यजादी चाष्टमं च नवमं पितृ पत्निकम्।।९६।।**
**येषु येषु च स्थानेषु ग्रहायं ये च संस्थिता:।**
**ग्रहाणां स्तै स्तै भावात् कथनीयं प्रयत्नत: ।।९७।।**

येषु येषु स्थानेषु ये-ये ग्रहा: संस्थिता भवन्ति तद् भावानुसारं ग्रहाणां शुभाशुभं फलं प्रयत्नेन कथनीयम्।

**पितृस्थाने यदाराहु: मातृस्थानं च पश्यति।**
**माता पितृभ्यां सहितं मारितं बालकं तथा।।९८।।**

यदि पितृस्थाने राहुभवेत् तथा मातृस्थानं पश्येत् तर्हि जातकेन माता पिता सह मिलित्वा एकं बालकं मारितं ज्ञेयम्।

**भ्रातृस्थाने यादराहु शनिश्र्चरो यदि पश्यति।**
**क्रूर कर्मकृतं चैन पितृ पुत्रवधं तथा।।९९।।**

यदि तृतीय भावे राहु भवेत् तथा तं राहुं शनैश्र्चर पश्चेत् तर्हि जातकेन पिता-

पुत्र बधं तथा अन्य क्रूरकर्म कृतं ज्ञेयम्।

**चतुर्थमातृभवनं शनि नाक्रमितं यदि।**

**तदासापत्नयोमाता मारिता च न संशय।।१००।।**

यदि चतुर्थ स्थाने मातृभवने शनिचेत् जातकेन सापत्नि मातुः वधं कृतं ज्ञेयम्

**मूर्तौयदी भानुपुत्रः केतुना यदि संस्थितः।**

**भौमेन यदि दृष्टिः स्यात खिल्लिकात्रयमारितम्।।१।।**

यदि लग्नभावे शनि केतुनासह स्थितो भवेत् चेत् तथा भौमः तं पश्येत् तर्हि जातकेन खिल्लिका त्रयम् मारितं ज्ञेयम्।

**गृहेचा त्रयजातं च पुत्रं वा सहोदरम्।**

**मरणे त्रयज्ञातव्यं राहुणा यदि वीक्षिते।। २।।**

**लग्नहोर च द्रेष्काणं षडाष्टं द्वादशांशकम्।**

**लग्नभावात्पूर्वकमं ज्ञायते च शुभाशुभम्।।३।।**

**लग्नंशः ज्ञात्वचैवग्रह भाव विधीयते।**

**ततभ्दावगतैः खेटैः सर्वकर्मप्रकाशके।। ४।।**

लग्नांश ज्ञात्वा ग्रहाणां भावज्ञानं जायते तथा यस्मिन् यस्मिन् भावे ये-ये ग्रहा स्युः तत् तदानुसारं जातकस्य सर्वकर्म प्रकाशितं भवति।

**लग्नवर्ण विचारेण ग्रहभावेन संयुतम्।**

**तत्सर्वं कथ्यते सम्यक पूर्वदेहसमुद्भवम्।।५।।**

लग्नवर्णं विचार्य तस्मिन ग्रहभावे संयुतेसति जातकस्य पूर्वजन्म समुद्भवफलं सम्यक् कथयतं शक्यते।

**लग्नंतु द्विगुणं कृत्वा तिथिवारं च मिश्रितम्।**

**पृच्छकन्याहरेच्चैव शेषांकेच शुभाशुभम्।। ६।।**

लग्नाकं द्विगुण कृत्य तस्मिन् तिथिवार संयुति कृत्य पृच्द्कस्य नामाक्षरैः हरहित्वा यः शेष आगच्द्वेत तदनुसारं शुभाशुभं कथायितुं शक्यते।

**तिथिवारंच नक्षत्रं एकीकृत्वा द्विधापुनः।**

**लग्नाक्षरैर्हरेदभागं शेषं च कर्मणः फलम्।। ७।।**

तिथिवारं तथा नक्षत्रं तं द्विधा कृत्य लग्नाक्षरैः हरयित्वा यः शेषः आगच्छेत तदनुसारं कर्मणः फलं ज्ञेयम्।

**एकेनदक्षणो जन्म द्वाभ्यां पूर्वसुमेवच।**

त्रिभि: श्र्चैवोत्तरे जन्म पंचभि: पश्र्चिमेतथा।। ८।।

यदि एक: शेष: भवेत् चेत् दक्षिणे द्विशेष: प्राच्यां त्रिशैषे उत्तरे, पञ्चशेषे पश्र्चिमे जन्मं ज्ञेयम्।

षडभिर्वायण्य के चैव सप्रभिनैऋते तथा।

नवभिश्र्चग्निकोणे च दशाश्र्वैशानमेव च।। ९।।

षड्शेष वायव्ये सप्तमशेषे नैकृत्ये, नवशेष आग्नेयां तथा दशशेषे ऐशान्यां जन्मं ज्ञेयम्।

तृतीयं हननंचैव पानं चैव चतुर्थकम्।।१०।।

एवमेव प्रकारेण होरा द्रेष्काण भावत:।

अरूणत्वया ज्ञातव्यं मन्मुखात्छास्त्रवेदितम्।।११।।

हे अरूण त्वया मन्मुखात् वेदितं शास्त्रं एवमेव प्रकारेण होरा द्रेष्काण भावत: ज्ञातव्यम्।

श्री सूर्यउवाच।।

नारायणं भवभयाति र्भयाश्र्च भीता: ।

नराधयो नहि भजंति पतात्रिराज:।। १२।।

तस्माद्दोषमहादर्क फलहानि भयात्मकम् ।

आवयो दैव तैरासीत व्यादिभ्यसतुनेष्यति।।१३।।

अरूणोवाच

कथं चेदं भवेत् स्वामिन् दंपत्यो रन पत्यकृत्।

स्त्रीपुसंश्र्च कृतंवापि कर्मतन्मेप्रकाशयम्।।१४।।

हे स्वाभिमिन् इदं अनपत्यकृत् दोष: दंप्तयो: कथं भवेत् तथा स्त्रीपुंसयो किं कर्म तन् मे प्रकाशय।

श्री सूर्यउवाच

भेद: सूक्ष्मतरोत्येष विदग्धैदैववेद्भि:।

वेत्तुशक्यो यथा तेन उपायंभवतामिते।। १५।।

विदग्धै: ज्योतिषिभि: एष: सूक्ष्मतर भेद: वेत्तुं शक्य: अत: उपायं कथयामि

**नरस्य पृच्छत: सूतस्त्रियोताप्युभयोरथा।**

**क्षितिजा तनयधूनात कार्यकर्म प्रकाशनम्।। १६।।**

नरेणपृच्छेसति तस्य पुत्रपत्निदु:खं भौमात् पञ्चम एवं सप्तमस्थानस्य स्थित्वानुसारं सवकर्मं वक्तव्यम्।

**क्रूरैद्विभावभावस्थै क्रूर दृष्टया तथैव च।**

**पुंस्त्रीरंगानात्पुसोक्रमाज्ञेयं पुराकृतम्।।१७।।**

**अतिसूक्ष्मतरोभेदो दुर्विज्ञेयोल्पबुद्धिभि:।**

**लक्षणैस्तत्समं ज्ञानं मया ते कथितं नरा।।।।**

अल्पबुद्धिभि: दूर्विज्ञेयं सूक्ष्मतभेद: लक्षणै: सह कथितं मया।

**पुनश्र्चकथयिष्यामि कथ्यमानं च त्वां श्रृणु।**

**दंपत्योर्जन्म लग्नाद्वातात्कालं प्रश्नभेदत:।। १८।।**

दम्पत्यौर्जन्मलग्नात् वा तत्काल लग्नात् प्रश्नभेदत: पुनश्र्च कथयिष्यामि। अत: त्वां च कथ्यमानं श्रृणु।

**लग्नधीस्थानतो पुंसो द्यून धी: स्थानतोस्त्रिय:।**

**क्रूरदृष्टि गंमुख्यास्तु भानिसम्यकपुराकृतै:।।१९।।**

लग्नाधीस्थानत: पुरूष: तथा द्यूनधीस्थानात् स्त्रिय: मुख्यत्वेन क्रूर दृष्टिग: ग्रहा: पूर्वकृतकर्मं आदिशन्ति।

**एतदापत्यजं कर्मस्त्रीकृतं चाऽथपुंकृतम्।**

**निर्धार्य तस्यसंज्ञानं नोपायोन्योस्ति किंचन।। २०।।**

एतद् स्त्रीकृतं पुंकृतम् अपत्यजं कर्म निर्धार्य तस्य संज्ञानं एव उपाय: अस्ति नान्य किंचनम्।

**तनुर्वितव्ययो वाच्यं जन्म वच्चतत स्तत:।**

**अतीतानागतं देहे विज्ञाय मखिलंचयत्।। २१।।**

तनुभाव: वित्तभावस्य व्ययभाव: वर्तते तथा जन्मभावस्य व्ययभाव द्वादशभाव एव वर्तते। एतावत् करणेसति स्वकीय अखिलं अतीत एवं अनागर्त सर्वकर्म देहभावात् अग्रेपृष्ठे गत्वा ज्ञातव्यम्।

**निगद्य निर्विशंकेन प्राक्तनम् प्रत्ययावहम्।**

**अतीता पुरूषा मेस्य.. नामपि जन्मनम्।।२३।।**

**तत्कर्मभाविनिश्र्चित्य अनपत्यादि लक्षणम्।**

**प्रतिवेश्मदयोपत्ये ग्रहीतं परितेस्थितैः ।।२३।।**

अनपत्यादि लक्षणं निश्चित्य तत् भाविकर्म कथनीयम्। यथा प्रतिवेश्मादि अपत्यं वा परितस्थितस्य अपत्य ग्रहणम्।

**सहजादि स्वभ्रातृन पितृमातृष्ववसादय।**

**बांधवोरिपवो मित्रं श्याला: संबंधिदैवरान्।। २४।।**

सहजादि भ्रातरः पितृष्वसा वा मातृष्वसा वांधव, रिपवः मित्र, श्यालाः इत्यादि सम्बधिनां अपत्यं गृहितं शक्यते।

**पंचधापत्यदुः खाद्यास्तत्रभावगतैर्ग्रहैः।**

**तत्तद्भावश्च संतान भावगैश्च खगेश्वरा।।२५।।**

पंञ्चधादु:ख तत्रभावगतैः ग्रहै संचिन्त्य तत् तद्भावानुसारं विचार्य सन्तान ग्रहणं करणीयम्।

**अरूणोवाच**

**लालनापालनाद्यर्थं धृतेविश्लेषितेत्वया।**

**शिशौमृतेमृतापत्यं लक्षणं वदमेप्रभो।।२६।।**

हे प्रभु लालनपालन इत्यार्थं धृतबालक विषये त्वया विश्लेषितम् किन्तु शिशोमृते वा मृतापत्यं तद्विषयकं लक्षणं मे कथय।

**श्री सूर्यउवाच**

**स्त्रीधेनुवाडवादीनां शिशौ बहुगुणान्वितः।**

**क्रियादिनाग्रहीतोस्मिन् स्नेहाद्व द्रविणेच्छया।। २७।।**

**लालनापालनाद्यर्थं मात्रा विश्लेषितं शिश्रुम्।**

**मातुर्विरहदोषेण स्तन्यभावादिनाथवा।। २८।।**

मातालालनपालनाद्यर्थं शिशुं विश्लेषितं चेत् मातुः विरहदोषेणभावात् पर जन्मसु सह शिशु द्वि-त्रिमासे वा द्वि-त्रि वर्षे एव मातुः वियोगात् म्रियते।

**वियोगाच्च शिशुः पूर्वे म्रीयते परजन्मसु।**

**द्वित्र्यादिमासजातानां तथा द्वित्र्यादिहायनौ।। २९।।**

**स्त्रीधेनु वाडवाद्यायाः पूर्वोक्ताजीवजातयः।**

**प्रश्नोदितातुतभ्दावाः ग्राम्यारण्यबिलेशया।। ३०।।**

**नवांश द्वादशांशश्च चतुर्थांशंतथैव च।**

**त्र्यंशांश च वनितापुत्रः सुधियादैववेदिना।। ३१।।**

**चरराश्यादि भेदेन विश्रलेषाय च मादिशेत्।**

**यज्जात्या पत्य विश्लेषं मृतं तज्जातितस्य तु।। ३२।।**

सुधिया ज्योतिषिभिः नवमांश द्वादशांश-चतुर्थांश-त्रिशांश तथा चरादि राशि भेदेन विचार्य वनितापुत्रः विष्लेषाय कथनीयम् तथा यज्जातीय अपत्यं विषलेषितं तत्जातीय एवं मरणम् जातकाय आदिशेत्।

**वस्तुहानिर्व्ययोनष्टं मृतधायं भवेदिति।**

**विज्ञानादयविज्ञोमं विज्ञेयं प्रश्नभेदनात्।।३३।।**

वस्तुहानि, व्यय, कीर्ति इत्यादिनां नष्टता, स्वमृत्यु इत्यादि विज्ञानात् विचारं प्रश्नभेदनात् विज्ञेयम्।

**अधिकारवतो भावात चरराश्यादिभेदतः।**

**तस्मात सर्वप्रयत्नेन ज्ञेयंदैवात्र वेदिनाम्।। ३४।।**

ज्योतिषिभिः चरराश्यादि भेदतः अधिकारवतः दैवं सर्वप्रयत्नेन ज्ञेयम्।

**तस्मादेवपुनर्ज्ञेयाः जातयोजीवयोनयः।**

**नृचतुष्पदकीटादि ग्रामारण्योविलेथवा।। 35।।**

**सुरभीवडवा जावीषरोहेण प्रवंगमा।**

**शाशकख्यादयो जीवाः जातयो नृचतुष्पदाः।। ३६।।**

एतत् सर्व विचार्य जातकस्य पुनर्जन्मजाति चतुष्टपद कीटादिजीवयोनी तथा ग्रामरण्ये वा विलेजन्म इत्यादपि ज्ञात्वा पुत्रग्रहणं कथनीयम्।

**जरायु जाउभ्दिजाद्या क्रोडाद्यादंष्ट्रिणःस्तथा।**

**ग्राम्यारण्याभेदभिन्ननकुलाद्यविलेशयाः।। ३७।।**

नकुलादि विलेषया जाति, जरायु, उद्भिज, क्रौडादि दृष्टि रहित जातयः तथा ग्रामे वा अरण्ये उभयत्र प्राप्तजातयः द्विपादि वर्ण भेदादि जातयः धामास्पद भगोक्त प्रश्न भेदतः निश्र्चेयः।

**द्विपदोवर्णभेदादिनिश्चेयः प्रश्नभेदतः।**

**धामास्पदभागोक्ता च जातयोनरपूर्वका।। ३८।।**

**भागाधिपयुते वर्णेः वर्षेशाद्वर्णनिश्र्चियः।**

**स्वामिमित्राणि ये चान्येःपुत्रासु रूद्वोत्तमाः।। ३९।।**

वर्षकुण्डलीत: तथा नवमांश कुण्डलीत: अधिपस्य वर्णनिश्चये कृत्वा स्वामीतथा मित्र ग्रहाणां स्थिति अवलोक्य सुह्दोत्तम पुत्रस्य चयनं करणीयम्।

**नीचाचास्तगतैः खेटैः नानाकर्मप्रकाश्कैः।**

**कृतेकर्मविनिधिरि अमंत्रीचप्रयोजकाः।।४०।।**

अमन्त्रि प्रयोजकेन सह ज्योतिर्विदैः कृतकर्म निधरि तत् तद् भाव गतानां गृहाणां नीचत्व वा अस्तता स्थिति दृष्ट्वा हेति वा आपत् इत्यादि दृष्ट्वा प्रोत्साहनं विरोधं वा करणीयम्।

**प्रोत्साहादि पूर्वाश्च तत्तभ्दावगतैर्ग्रहैः।**

**कालिव्यंगकपोताभ्दिहेतियारापतादया।। ४१।।**

**पक्षिणो दकभागाद्रौविज्ञेया दैववेदिना।**

**मृत्यैः भु तनुजा संख्या कर्तुप्राग्जानि निश्चयाः।।४२।।**

दैववेदिनां मृत्यैः तनुजासंख्या तथा पक्षिणोदक भागादि पुनर्जन्म निश्चय पूर्वकं प्राज्ञात्वा विज्ञेया।

**जननी बालयोश्चापि कीर्तयेतप्रश्नादपि।**

**जराद्युद्भ्दिजायोजीवा त्याज्याजातिनिश्चयः।। ४३।।**

ज्योतिषिभिः प्रश्नलग्नात् जातकस्य जराउदंभिजादि जीव योनि, त्याज्यजाति जननी बालक इत्यादिनां निश्चय कारणीयम्।

**लक्षणैः प्रश्नभावादि विज्ञेयादैववेदिना।**

**लक्षणैः कर्मनिर्धार्यकर्तव्येति विपश्चिता।। ४४।।**

दैववेदिना प्रश्नभावादि लक्षणैः विपञ्चितः कर्मनिर्धाये कर्तव्यकर्म विज्ञेयमं।

अधिकारवतो भावत् पूर्ववत प्रश्नभेदितः।

**सुकर्मययोमित्रश्चशत्रुदासीभतादिभिः।।**

**मित्रत्वे द्रव्यविश्वासात् कर्तृत्वेवैरतोथवा।।४५।।**

अधिकारवतः भावात् ज्योतिषिभिः प्रश्नभेदितः सुकर्म दुष्कर्म तथा मित्रशत्रुदासी इत्यादिभिः मित्रत्व विश्वाशेण द्रव्य प्रदानं वा शत्रुभ्य कर्तत्वेन वैर इत्यादि चिन्तनियम्।

**उदासीनेप्रमादेनावक्तव्यं दैववेदिनाः।**

**शास्त्रेणनिहतेतस्मिन दंतशस्त्रास्ततोव्रणी।।४६।।**

HANSA MEHTA LIBRARY

दैववेदिन उदासीनवस्थायं वा प्रमादवस्थायां किमपि नवक्तव्यं। अन्यथा दन्तशस्त्रात् घातकरणे यथा चिन्हं भवति। तथैव जातकस्य मनसी अस्मिन् शास्त्रप्रति लांछनरूप व्रणं जायते।

**लकुटग्रावभिर्हत्वा अस्थिभंगप्रजायते।**
**विषाग्नितान्गिमांद्यादिवालगुल्मोर्ध मारूत।। ४७।।**
**दंष्ट्री श्रृंगीविषादिभ्यो वेत्रनातुभवेदिति।**
**लक्षणैर्लक्षयेदेतौ तस्यहन्यनकारणम्।। ४८।।**

दैवज्ञैः ग्रहलक्षणैः जातकस्य दृष्टी श्रृंगी विषादि प्राणिभिः जातकस्य हननकरणं ज्ञातव्यम्।

**अनेन विहतेचैव कर्मण्यं अन्यतत्कृतम्।**
**शोधना पापक्षयाय कर्तुप्रत्ययनेदितम्।। ४९।।**

दैवज्ञैः जातकस्य हननकारण ज्ञात्वा अन्यतत्कृतं कर्म कर्मण्यं तथा कर्तुः शोधन पापक्षयाय प्रेरितव्यम्।

**अरोगिणां कृतंपथ्यं औषधंदोष..द्यथा।**
**रोगिणो न च रोगघ्नं प्रायश्चितंतथापगा।। ५०।।**

यथा अरोगिणांकृते दत्तं औषधं दोषरूपः तथा रोगिणां कृते औषधं रोघहननं तथैव प्रायश्चितं अपि पापिनां कृते एवं फलदायकम्।

**श्री सूर्य उवाच**

**आधिव्याधिमनोजंतु विरक्तश्चापिते यदा।**
**दैवज्ञंस तदा विमनिजं दुःख विनिवेदयेत्।। ५१।।**

यदा ग्रहाः विरक्तश्चेत् तदा दैवज्ञ विमनिजः आधिव्याधि उपाधि इत्यादि दुःखं निवेदनीयम्।

**ततःस्तगृहमादाय दैवज्ञोमितकोविदाम्।**
**श्रध्ययापरया सम्यक् पूजयन्ते द्विविधार्हणैः।। ५२।।**

ततः मितकोविदां दैवज्ञः ग्रहमादाय विविधार्हणैः श्रद्धयापरभूत्वा देवं सम्यक् पूजयेत्।

**विप्रानन्याश्र्वसतान समायदगुणान्वितान्।**
**सुश्रुभेनुदिने चैव पूजये दिष्टदैवताम्।। ५३।।**

सद्वृत्तान् समाद्भय गुणान्वित्तान विप्रान तथा अन्यान् अनुदिने यजमान

सुश्रुभे तथा इष्टदेवतां पूजयेत्।

**पुस्तकस्वं ततो ज्ञानं सम्यक् भास्करपूजनम्।**
**भूरिद्रविणदानाधै विशेषै विविधार्हणै: ।। ५४ ।।**

ज्ञानभास्कर ग्रन्थस्य सम्यक् पूजनं कृत्वा द्रविणदानादि विशेषरूपेण, विविधप्रकारै दानं करणीयम्।

**वाचाकं जपयज्ञेन मानसंश्रवणादिभि: ।**
**कायिकं दान होमाद्यै: पापंशांतिनयेत्सुधी ।। ५५ ।।**

वाचकं मानसं तथाकायिकं पापानां शान्ति: क्रमेण जपयज्ञेन, श्रवणादिभि: तथा दानहोमादिक्रमै: शुद्धयेत्।

**इति श्री ज्ञान भास्करे सूर्यारूणसंवादे होराद्रेष्काणनामाध्यम्।**

**अर्थकर्मप्रकाश:**

**क्रोष्टुकीरूवाच**

**भगवन् मुनिशाईल तत्वदर्शीजितेद्रय: ।**
**ज्योतिषं श्रोतुमिच्छामि पूर्वजन्मकृतंफलम् ।। ५७ ।।**

हे मुनि शाईल हे तत्वदर्शि हे जितेन्द्रीय अहं पूर्वजन्मकृतं ज्योतिषं फलं श्रोत्रुमिच्छामि।

**ज्ञायते प्राक्तजं जन्मउत्तमे मध्यमे कुले।**
**अधमेचमुनिश्रेष्ठ तन्मेब्रूहिति निश्चितम् ।। ५८ ।।**

हे मुनि श्रेष्ठ येन ज्योतिषेन पूर्वजन्म ज्ञायते यथा उत्तमेमध्यमे अधमेकुले इति तन्मे ब्रूही।

**।। गर्गोवाच ।।**

**क्रोष्टके श्रृणुवक्ष्यामि ज्योतिषं ज्ञानकारणम्।**
**येनविज्ञान मात्रेण नरोपापात प्रमुच्यते ।। ५८ (१) ।।**

श्रृणु क्रोष्टिके येन विज्ञान मात्रेण नरोपापात् प्रमुच्यते तादृशं ज्ञानकरणं ज्योतिषं वक्ष्यामि।

**उत्पत्तिश्च्व विपत्तिश्च्व भूतानामपिजायते।**

**पूर्वकर्मवशाज्जन्म जायतेबहुयोनिषु।। ५९।।**

पूर्वकर्मवशात् वहुयोनिषु जन्मजायते तथा भूतानां उत्तपत्ति विपतिं च पूर्वकर्मवशात् जायते।

**नरेषु सिंहेषु विक्षगोष्वपि श्र्वाजहयोष्ट्रकेष्वपि।**

**खरोष्ट्रापिव्याघ्रमृगोरूगेष्वपि शुभा श्रुभं कर्मवशाद्भवति ।। ६०।।**

नर: सिह: विविधपक्षि: गो: स्वान: अश्र्व: उष्ट्र: खर: व्याध्र: मृग: इत्यादि योनिषु शुभाशुभ कर्म वशाद् जन्मभवन्ति।

**नाना जातिषु विप्रेद्रं जीवोभ्रमति कर्मणा।**

**ज्ञाति: स्मरा प्रकृतिं च नमुंचति कदाचन।। ६१।।**

तस्य ज्ञाति स्मृति तथा प्रकृति कदादि नमुञ्चति।

**पूर्वजन्मनि विप्रेन्द्रं उत्तमामध्यमाधमा:।**

**तेषां नु राशि चक्रेण विज्ञेयं जातिकारणम्।। ६२।।**

हे विपेनद्र राशि चक्रेण जातकस्य जातिकारणं तथा उत्तममध्यम अधमादि जातिषु पूर्वजन्मं कश्याम् जात्याम् इति विज्ञेयम्।

**पूर्व विलोक्य प्रकृतिं नृणां चैवतत:पराम्।**

**शरीरावयवंशीलं पूर्वजन्मनियत्कृतम्।। ६३।।**

नृणां प्रकृतिं पूर्व विलोक्य तत: परां शरीर, अवयव शील इत्यादि पूर्वजन्मकृत कर्म ज्ञेयम्।

**यैवेदयाक्षमावंतं सत्यवंत जितेद्रिय:।**

**चाण्डालवंश जातास्ते ब्राह्मणानां पूर्वजन्मनि।। ६४।।**

**अनेनैव प्रकारेण प्रकृति जातिकारणम्।**

**विनाज्योतिषशास्त्रेण नतां जानंतिपंडिता।। ६५।।**

अनेन एव प्रकारेण जातिकारणं प्रकृति: तां प्रकृतिं ज्योतिष शास्त्रेणविना पण्डिता: न जनन्ति।

**ग्रहभावेन चाप्युक्ता ज्ञातिर्यामध्यमाधमा।।**

**मन: कृशेतिचेत्साक्षं सतेद्दोपूर्वजन्मजा।। ६६।।**

**क्रोष्टुदारोवाच**

**मने:जानाति वै जाति प्रकृत्य ऋषिसत्तम।**

**कदाचिज्जोतिषेशास्त्रे विज्ञातव्यं विपश्चितः।। ६७।।**

हे ऋषिसत्तमः विपाश्चितः जाति एवं प्रकृति मनः जानाति कदाचित् ज्योतिषेशास्त्रे विज्ञातव्यम्।

**गर्गोवाच**

**शुभं वा शुभं जन्म सुकूलेदुः कुलेपिवा।**

**इत्येत्तचिंतइत्वातु प्रश्नादेवामनोदधौ।। ६८।।**

मनः सागरे प्रश्नादेव पूर्वजन्मस्य शुभाशुभफलं तथा पूर्वजन्मस्य सुकूल वा दुकूल इत्यादि चिन्तनीयम्।

**ये जानाति नरा जन्मः पूर्व जाति समुद्भ्दवम्।**

**मुच्यते सर्वपापेभ्यो धौतं वस्त्रमलैर्यथा।। ६९।।**

यथा मलीन वस्त्र मलदूरीकरणे स्वच्छभवति तथैव यः नरः पूर्वजन्म तथा पूर्वजातिसमुद्भव जानाति सः सर्वपाभेभ्यमुच्यते।

**कस्मिन जातौ समुत्पननः पूर्वजन्मन्यहं विभो।**

**लग्न तात्कालिकं साध्यं तदातस्यनसंशय।। ७०।।**

हे विभो अहं पूर्वजन्मनि कस्मिन् जातौ समुत्पन्न इति प्रश्नोद् भवे, विना संशयेन तात्कालिकं लग्नं साध्यम्।

**पृच्द्कयदि पृच्द्वेत पूर्वजन्मदीयकम्।**

**कथयत्वंयथातथ्यं ब्रूहिसम्यकपूर्वजम्।। ७१।।**

यदि पृच्छकःस्वकीय पूर्वजन्मं पृच्छेत यथा मम पूर्वजन्मकर्म सम्यक्तया यथा तथ्यम् त्वं कथय।

**वहमानातुयल्लग्नं लग्ने पश्यंति ये ग्रहाः।**

**पूर्वजन्मः स्तदासाध्यं विज्ञातव्यं खगेश्वर।। ७२।।**

हे खगेश्र्वर वहमानलग्ने तथा तं लग्नं ये ग्रहाः पश्यन्ति तदनुसारं जातकस्य पूर्वजन्म विज्ञातव्यम्।

**मिहिरादयोयेः सर्वे प्रयोज्याः स्तत्र खेचराः।**

**विक्रान्ति चारायेराशौ वक्रेरोया बुधै सदा।। ७३।।**

तात्कालिक कुण्डल्यां सूर्यादि ये खेचराः ग्रहाः प्रयोज्याः तेषां चरादि विक्रान्ति तथा राशौ वक्रादि गतिः अनुसारं बुधैः सदापूर्वजन्मं ज्ञेयम्।

**लग्नाद्वालग्नानाथाद्वा सूर्योधिष्टित राशितः।**
**केचिद्वदंतिदेवज्ञाः खेतरैवार्गेद्रगैः।। ७४।।**
**रविर्वदति सारथीजातिश्र्चेन्ममध्यामाधमा।**
**दशमेसाश्रितायेषा ज्योतिषांयदि कश्यप।। ७५।।**

हे सारथी ज्योतिषां पति कश्यपानुसारेण यदि सूर्यः दशमस्थाने अश्रितश्र्चेत् जातकस्य पूर्वजाति मध्यमा वा अधमा ज्ञेया।

**ज्योतिषं आगमं वेदं प्रतिपतौप्रकीर्तितम।**
**केद्रंस्थानगतैर्वाच्या पूर्वजातेश्रुभाश्रुभौ।। ७६।।**

प्रतिपतौ ज्योतिषं आगमं वेदं प्रकीर्तितम्। पूर्वजन्मस्य शुभाशुभ फलं केन्द्र स्थानगतैः ग्रहै वक्तव्यम्।

**यदावृषेवाक्पति भे सितेन्तवौयदस्थितः।**
**गुरौ च तुर्येदशमे पाश्र्वे सदाचार विवेकस्य वेदिनं शास्त्रसर्वतः।। ७७।**

यदि गुरू वृषभस्थभुत्वा चतुर्थे दशमे वा एकादशे स्यात् तथा शुक्रः लग्नेस्यात् तर्हि जातकः पूर्वजन्मनी सर्वपूजितः उत्तमद्विजः आसीत् इति ज्ञातव्यम्।

**जानीहि जन्मन्यपरेद्दिजोत्तमं सर्वपूजितः।**
**गुरू सप्तमगः शुक्र दशमेभुवनेयदि।।**
**तदा विप्रविजानीयात् पूर्वजन्मनिनिश्र्चितम्।। ७९।।**

यदि सप्रमस्थाने गुरू तथा दशमस्थाने शुक्रभवेत् चेत् पूर्वजन्मनी जातकः निश्र्चयेन विप्र विजानीयात्।

**यदा दशमगः सूर्यो भौमोवापि चतुर्थगः।**
**गेहत्तज्जन्मनीजानीही क्षत्रियंतं महाबलम।। ८१।। ८०**

यदा दशमस्थाने सूर्यः वा चतुर्थे भौमश्र्चेत् तं जातकं पूर्वजन्मनी महाबली क्षत्रीयः जानिही।

**बुधचंन्द्रौ यदाकेन्द्रोएकस्थौ वा विपर्यये।**
**भूमिजेनापि संदष्टौ वित्ये वैश्यंपूराद्विज।। ८२।।**

यदि केन्दे बुधचन्द्रौ एकस्थौ वा विपर्यये भवेत् तथा उभयोऽपरि भौमस्य दृष्टिचेत् जातकः पूर्वजन्मनी।

**मूतौ वा दशमेवापि यदिचंद्रो व्यवस्थितः।**

**न चकश्चित ग्रहोकेद्रे तदाशूद्रंपुराद्विज।। ८३।।**

यदि लग्न वा दशमस्थाने चन्द्रः भवेत् तथा केन्द्रे कोऽपि ग्रहः भवेत् तदा जातकः पूर्वजन्मनी शूद्रः ज्ञेयः।

**वर्णशंकर जातानां शनिस्थ प्रकीर्तिता।**
**सौरीचारं कृताभ्दावात तेषां जातिमतंश्रृणु।। ८४।।**

शनेः स्थान एवं स्थिति अनुसारं वर्णशंकर जातानां जातकानां जातिमतं कथयामि भवान् तत्श्रृणु।

**शनिभौमो यदालग्ने तृतीयभुवनेरविः।**
**तदा हीरजकंपूर्वं विप्रद्विधिसुनिश्चितम्।। ८५।।**

यदि लग्नस्थाने शनिभौम एवं तृतीयस्थाने सूर्यः भवेत् चेत् जातकः सुनिश्चततया पूर्वजन्मनि रजकः ज्ञेयः।

**सप्तमेभुवने राहुः शनिनायदिवीक्षिते।**
**चर्मकारं तदा विद्धि पूर्वजन्मनि निश्चितम्।। ८६।।**

यदि शनिना विक्षिताराहु सप्तमेस्थाने भवेत् तर्हि जातकः पूर्वजन्मनि निश्चिततया चर्मकारः ज्ञेयः।

**यदा तु दशमे सूर्यो सप्रमे शनिमंगलौ।**
**कुंभकारंतदा विद्धि पूर्वजन्मनिनिश्त्रिम्।। ८७।।**

यदिदशम स्थाने सूर्यः तथा सप्तमस्थाने शनिभौमश्र्चेत् जातकः पूर्वजन्मनी कुम्भकार ज्ञेयः।

**चतुर्थे शनिभौमो च लग्ने राहु रविः शनि।**
**म्लेच्छतं विजानीयात् पूर्वजन्मनि निश्चितम्।। ८८।।**

यदि चतुर्थस्थाने शनिभौम तथा प्रथमभावे शनि राहुसूर्यः सूर्यश्र्चेत् तं जातकं पूर्वजन्मनी निश्चिततया म्लेच्छः ज्ञेयः।

**मूर्तो वा स्वभुवनस्थौ यदि सूर्यो तृतीयगौ।**
**यदि कश्चित ग्रहः केन्द्रो नापितः पूर्वजन्मनि।। ८९।।**

यदि लग्नेसूर्यः व स्वगृहीसूर्य तृतीये तथा केन्द्रस्थाने कश्चित् ग्रहाश्र्चेत जातक पूर्वजन्मनि नापितः ज्ञेय।

**तनौराहुरविः सौरीभूमिसूनु चतुर्थके।**
**सूचिकारस्तदा विद्धि पूर्वजन्मनिश्चितम्।। ९० ।।**

यदि लग्नस्थाने रविराहु शनि भवेत् तथा भौमः चतुर्थस्थाने भवेत् तर्हिजातकः नैश्चित्येन सूचिकारः ज्ञेयः।

**शनिवक्रगतः केंद्रे भौम सूर्यसमन्वितः।**
**पूर्वजन्मनि विप्रेदं वागुरीकं भवेत्खल।। ९१ ।।**

वक्रीशनैश्चर समन्वित सूर्यराहु यदि केन्द्रचेत् निश्चित् रूपेण जातकः पूर्वजन्मनी वागुरीकः एवं खलः ज्ञेयः।

**दशमे राहु प्रार्तगे शनिभौमो चतुर्थगौ।**
**तंतु वायुतदागेयो पूर्वजन्मेन संशय।। ९२ ।।**
**शीर्षद्याम्रियदासौरी भौम राहुस्तैथव च।**
**शिरोत्तिवेदनाज्ञेया लंपटोघातिएव च।। ९३ ।।**
**अग्निदाहस्तुविज्ञेयः शीर्षेचैवतुनान्यथा।**
**लग्नातु द्वितीये चन्द्रे तदातस्यजलोद्भवम्।। ९४।।**
**लग्नाद्वितीय भुवने सितिजश्च भवेद्यदि।**
**द्रव्योत्पत्ति प्रचुरा चपरं त्रासनंतथा।। ९५ ।।**

यदि लग्नाद् द्वितीयस्थाने भौमश्चेत् प्रचूराधनोत्पत्ति ज्ञेया तथा तत्नाशं अपि ज्ञेयम्।

**लग्नाद्वितीय भुवने दिनाधिपयदिभवेत्।**
**तदाजनभवेद्देषी ज्ञातव्यं कश्यपात्मज।। ९६ ।।**

हे कश्यपात्मज लग्नाद् द्वितीय भुवने सूर्यश्चेत् तदा जातकः गतजन्मे द्वेषी ज्ञेय।

**लग्नाद्वितीयभुवने यदि भवति शनैश्चरः।**
**नयनेतुभवेत्पीडा सत्यं भवति नान्यथा।। ९७ ।।**

यदि द्वितीयस्थाने शनैश्चर भवेत् चेत् गतजन्मेजातकाय सत्यमेव नयनपीड़ा ज्ञेया।

**कांस्यादिधातु हर्ता च ............निकंततिः।**
**लग्नतु द्वितीय श्च करोति मौक्तिको धनिः।। ९८ ।।**

**पटुकौलादि वस्त्रादी क्रूर रविचरणादि दृष्टित्वात्।**

**यदि भवति बहुधाम्नी राहुः करोति प्रचुरांपीडा।। ९९ ।।**

**सौम्योदृष्टो यदीस्यात् त्रीन्सहजान् भगिन्यादीनि।**

**प्रणाशयति।।१०० ।।**

सौम्यस्यदृष्टी यदी भवेत् चेत् जातकः स्वीकय त्रीन्संख्याकान् भगिन्यादि सहादेरान् प्रयत्नेन नाशयति।

**तथावाहु रूग्णं कृष्णलांच्छनम् भवति।**

**लकुटाग्राववातश्च भवति।।**

**सहजधाम्नी शुक्र प्रकरोत्रयाणां भ्रातृणां सुखम्।। १ ।।**

**पापदृष्टोपि यदिचेत तदा द्वयोर्नाश करोति पुंसाम्।**

**एकाच भगिन्या राहुदृष्टश्चेत तर्हि प्रकरोति भयं सर्पात्।। २ ।।**

यदि पापदृष्टो भवेत चेत् पुरूषद्वयं नाशयति तथा राहुदृष्टश्चेत् एका भागिम्याकृते सर्पभयं प्रकरोति।

**नीरच्च सहजधाम्नी क्षितिजः श्चेत तदा विदध्यात।**

**भ्रातृवर्गादीनां सुखं विज्ञेया।।३ ।।**

**शुक्रेणदृष्टः सन् प्रकरोति सहजकंठमाली।**

**सहजधाम्नी रवि राहु दृष्टो भवति यदि स्यात्।।**

**तर्हि सहजात विस्फोटक व्याधि करोति।।४।।**

यदिशुक्रेणश्यात् तदा सहजाय कण्डमाली नामकरोगं करोति। तृतीयस्थाने सूर्यः राहुणा दृष्टस्यात् तर्हि जातकस्य सहजाय विस्फोटक नामकरोगं करोति।

**हृदिस्थोमार्तडः प्रकरोति हृदिपीडाम्।**

**क्षिति जेतत्रस्थितेन अतः हृदि वन्हिदाहं करोति।। ६ ।।**

यदि चतुर्थस्थाने सूर्यस्चेत् हृदिपीड़ां करोति तथा यदि चतुर्थस्थाने भौमश्चेत् हृदिवन्हिदाहं करोति।

**जनन्यां प्रचुरां पीड़ा कुरूते।। स्वभानुनादृष्टः सन तर्हीमात-**

**तस्पर्धा करोति सौरिणा दृष्टश्चेतर्हि लोहहर्ताभवेत।। ७ ।।**

जनन्ये प्रचुरांपीड़ा कुरूते। भानुना दृष्टीः चेत् यदा मात्तस्पर्धा करोति, मन्दः पश्येत् तदा लोहहर्ता भवेत्।

**भौमेन दृष्टश्र्चेतां मुहुर्ताच्चार विनादृष्टः सन तर्हि।**
**रूपहर्ता च ।।८।।**
मुहुर्ताचार बिना यदि भौमेन दृष्टः चेत् रूपहर्ताभवति।
**चंद्रमयादृष्टाश्र्वे तर्हि प्रचुरं सुखंभवति।**
**चतुः पदापंचमोरविः स्यात् ।। सौम्यग्रहाणांदृष्टि।।९।।**
**यदि सोमेन दृष्टश्र्चेत् तर्हि प्रचुरं सुखं भवति।**
**पूर्वपुत्र त्रयं जाता करोतिपुंस।। श्रून्यस्पात।।**
**सौरि प्रकरोति दृष्टि गूढागर्भोपजायते।। १०।।**
यदाराहुणानिरीक्षेत तर्हि उदरे व्याधी प्रकरोति,अवनिजस्तत्रभवति।।
यदि शनैश्र्चरश्र्चदृष्टीः चेत् गूढगर्भजायते।
उदरेवन्हि दाहं करोति।। ११।।
यदि राहुणा दृष्टश्र्चेत् तर्हि उदरेव्याधि करोति तथा तत्र भौमश्र्चेत् उदरे अग्निदाहं करोति।
**यदाचंद्र पश्र्चिमश्र्चेत तदा प्रकरोति उदारव्याधिम्।।**
**तस्कर भयं च षष्ट्यादिः स्वर्भानुरविणा निरीक्षितः।। १२।।**
यद चन्द्रः पश्र्चिमश्र्चेत् तदा उदर व्याधिंकरोति तथा तस्करभयं च भवति।
कटि लकुटघातं भूमौ पततियत्।।
**जायाभावगतोराहुः जायांयदि निरीक्षितः।। १३।।**
**जायामारणं तदाज्ञेयं ज्ञातव्यंच नसंशयः।**
**अवनिजेन निरीक्षितः सन् गुह्ये कृष्णलच्छनम् भवति।। १४।।**
यदि सूर्य वा सूर्यदृष्टिः षष्ठेश्र्चेत् कट्यां घातः ज्ञेयः। यदि राहु वा राहुदृष्टीः जायाभावेश्र्चेत् विनासंशेयन जायामारणं ज्ञातव्यम्।
**तदाजायंनित्यमासं हरिति रतिविपाप यदिनिरीक्षितः।।**
**तर्हि कुटिलां भार्याप्रकरोति।। १५।। एकस्यमातुलंनाशः: ।।**
यदि भौमेन दृष्टश्र्चेत् गुध्यस्थाने कृष्णलांद्दनं ज्ञेयं। तदाभार्यानित्यं आसंहरति, पापग्रहाणां दृष्टिश्र्चेत् भार्यां कुटिलाभवति।
**चन्द्रेण निरीक्षितः सन् प्रचुरं करोति सुखं भार्यायाः।**
**छिद्रचंद्रस्थः प्रकरोति दुष्ट वृद्धिः ।।१६।।**
चन्द्रेण दृष्टश्र्चेत् भार्यायाः प्रचुरंसुखं ददाति यदि छिद्रस्थ चन्द्रश्र्चेत् दुष्टवुद्धिं

ददाति।

**सौरिणा निरीक्षितश्च्वेत वर्षेषोडशमृत्युः।।**

**प्रायोव्याधिस्तस्यच जायते।।१७।।**

यदि शनैश्चरेण दृष्टश्च्वेत् षोडशे वर्षे मृत्युर्ज्ञेय, तथा प्रायः व्याधिना एव मृत्युः भवति।

**धर्मभावे यदा स्वभानुःसौरिणा यदि निरीक्षेत्**

**धर्महानिः स्तदा ज्ञेया (इति) होरायां परिकीर्तनात्॥**

धर्मभावेयदा स्वर्भानुश्चेत् तथा शनैश्चरेण दृष्टश्च्वेत् तदा धर्महानी ज्ञेया इति होरायां परिकीर्तनम्।

**अहिके पुत्रमृत्युत्वं भवेन्नाशी ब्रह्मणास्तथा।।१८।।**

**चन्द्रेण यदा निरीक्षितः॥तदाकर्णपीडां करोति॥**

**कर्मभावेतुमार्तड सौरिणायन्निरीक्षितः।**

**राहुणा कृत् दृष्टिस्यात् जनकस्यमरणं ध्रुवम्॥१८॥**

धर्मभावेस्वर्भानुः यदि चन्द्रेण निरिक्षितः चेत् कर्णपीड़ां करोति। कर्मभावे यदा सूर्यश्चेत् तथा शनैश्चर राहुभ्यां दृष्टीः चेत् जातकस्य मरणं ज्ञेयम्।

**क्षितिजेनयदादृष्टया निरीक्षित।**

**तदाभवति हृदि लोहघातं॥१९॥(प्रतीयते यत् प्रक्षिप्तः)**

**यदि भौमेन दृष्टश्च्वेत् तदा हृदिलोहघातं भवति।**

**चन्द्रेणयदि कृत दृष्टिः स्तदाभवति कांस्यहर्ताच।**

**एकादशस्थे प्रकरोति सूर्यः पीडां सुदुष्करां नितरां चकर्णौ॥ २०॥**

यदि चन्द्रस्य दृष्टिश्च्वेत् तदा कांश्यहर्ताभवति। यदि एकादशस्थाने सूर्यश्चेत् तदा नितरांसुदुस्करां कर्णपीड़ां करोति।

**द्वादशे च यदाराहु शुक्रेण यदि पश्यति॥**

**समविषमं भवति तस्यव्रणञ्च(तु) प्रजायते॥ २१॥**

यदि द्वादशे राहु शुक्रेण दृष्टश्च्वेत् तर्हि समविषमवा व्रणं प्रजायते।

**इति सूर्यारूण संवादे कर्मप्रकाशे चिन्हाध्यायप्रकाशः**

श्री सूर्यौवाच

वैनतेय यथा येन कर्मणिजंतवोनिशी।

सुखदुः खैर्न बाध्यंते तन्मेनिगदितं श्रुणु॥ १॥

हे वैनतेय येन कर्मणि जन्तवः सुखदुः खैः न बाध्यन्ते तत् कर्म कथयामि तत् श्रृणु।

लग्नतत्कालिकं नीत्वा ग्रहाःस्पष्टंश्चकारयेत्।

ग्रहाः पूर्वं कृतं कर्म दधुर्जानिश्चतत्त्वतः॥ २॥

तात्कालिकं लग्नं नित्वा स्पष्ट ग्रहान् च कृत्वा तत् ग्रहानुसारेण पूर्वकृतम् कर्म तत्वः ज्ञायते।

गुरूश्चैवभृगुर्जातो लग्नेतिष्टति वीक्षितः।

तदाविप्रंविजानीयात् पूर्वकर्मनिवन्धनम्॥ ३॥

गुरू शुक्रौ लग्नेभवेत् वा तयोः दृष्टिः लग्नेभवेत् चेत् तं जातकं पूर्वकर्मानुसारेण विप्रः ज्ञेयः।

सविता च क्षिते पुत्रोयदातुं ग्रहमागतः।

तदा चेदिक्षुणायुक्तो क्षत्रियोनात्रसंशयः॥ ४॥

सूर्य तथा भौम यदा तं ग्रहमागतश्चेत् वा दृष्टियुक्तश्चेत् तदा अशंशयोभृत्वा क्षत्रियः ज्ञेयः।

चन्द्रयुक्तो यदालग्ने यदा च बुधवीक्षितम्।

तदाश्रुद्रं विजानीयातत्त्वतो नात्र संशयः॥ ५॥

चन्द्रलग्नयदि बुधेन विक्षितश्चेत् विनासंशेयन तं जातकं शूद्रः ज्ञेयः

शनिना च क्रमितम् लग्नं दृष्टं वा रविसूनुना।

तदाकारूकुले जन्म ज्ञातव्यं कश्यपात्मज॥ ६॥

हे कश्यापात्मजः यदि लग्ने शनि वा शनिदृष्टिश्चेत् तदा वैश्यकुले जन्मज्ञेय।

केतुना बलिवृंदेन युक्तं दृष्टं यदा भवेत्।

अंत्यवर्णः तदाज्ञेयो लग्ने शून्येंऽत्यवर्णजः॥ ७॥

यदि वलवानकेतु लग्ने भवेत वा तस्यदृष्टि लग्नेभवेत तर्हि जातकः अत्यवर्ण ज्ञेय

कर्मणाजंतवः श्रेष्टाः अधमाजातिमान्पुयात्।

अधमाउत्तमाजाती मिहसंयो जयंति हि॥ ८॥

जंतवः कर्मणा एव श्रेष्ठा वा अधमाजाति प्राप्नोति तथा उत्तमावा अधमाजाति कर्मानुसारेण ग्रहाः संयोजयन्ति।

**विप्रश्चेभ्दूमिपुत्रेण शनिना दृष्टमेव च।**
**तदाज्ञेयं प्रयत्नेन ब्रह्महा गुरूतल्पग : ॥ ९ ॥**

यदि विप्रश्चेत् तदा भौमशनिभ्यां दृष्टमपिचेत् तदा तं जातकं प्रयत्नेन ब्रह्मघाति एवं गुरूतल्पगः ज्ञेयः।

**अथवाराहुदृष्टः केतुना वाथ वीक्षितः।**
**शिश्रुघाती विजानीयात् स्त्रीणां विषयकारकः॥ १० ॥**

अथवा विप्रावस्थायां राहु वा केतुना विक्षितश्चेत् तदा जातकं शिशुघाति एवं स्त्रीणां विषयकारकः विज्ञेय।

**एतेषांकल्मषाविप्रो मध्यमां योनिमागतः।**
**कुष्टीभगंदरीक्रूरो विशिस्त्रीविवर्जितः॥ ११ ॥**

एतैः क्रमैः सह विप्रः अस्मिन् जन्मे मध्यमायोनिष्ठ प्राप्तवान्। तथा अस्मिन् जन्मे कुष्टि, भगन्दरि, क्रूर विशिष तथा सुस्त्रीवर्जितः ज्ञेयः।

**क्षत्रियंचंद्रपुत्रेण राहुणा केतुनेक्षिताः।**
**दृष्टाट्यऽत्र कलया तस्यकर्मफलं च यत्॥ १२ ॥**

यदि क्षत्रियस्चेत् तदा बुधराहु केतुभिः दृष्टः वा अदृष्टा अवस्थायां तस्यकर्मफलम् कथयामि।

**अगम्यगो विजानीयात् ब्रह्मवित्तापहारकः।**
**गोहनश्च धर्महारीच विज्ञेयाः पापकर्मकृत्॥ १३ ॥**

तं जातकं अगम्यगः ब्रह्मवित्तापहारकः गोहन धर्महारी तथा पापकर्मकृत विज्ञेय।

**तदाजात्यंतरो विप्रो मृतवत्सः प्रजायते।**
**अपत्यरहितो वापि दरिद्रांकष्टभाक्भवेत् ॥ १४ ॥**

जात्यंतरात् विप्रभवेत् चेत् मृतवच्छ भवति वा दरिद्र कष्टभोक्ता वा अपत्यरहिता ज्ञेया।

**वैश्वस्तुगुरू सूर्याभ्यां राहुणाकेतुवीक्षितः।**
**ब्राह्मणोगोवधीस्तस्य शिशुनास्वामिनांतकृत्॥ १५ ॥**

वैश्य अवस्थायां गुरू सूर्याभ्यां यदि राहुकेतु विक्षितश्चेत् तं जातकं

ब्राह्मणघ्नं, गोघ्नं तथा शिशु स्वामिनां अंतकरः ज्ञेयः।

**जात्यंतरणजातोवा संजातोविगतप्रजाः।**

**मृत प्रजा वा जायेत महद्रोगैश्च पूरितः ॥ १६ ॥**

जात्यांन्तरे संजातश्चेत् विगतप्रजाज्ञेय। तस्य मृतप्रजाः भवन्ति वा उत्पनप्रजा महद्रोगैः पूरिता ज्ञेया।

**अथवा बुध भौमाभ्यां वीक्षितोवनितात्मजः।**

**धातुस्नेही विजानीयात् मंजिष्टारक्तवाससाम् ॥१७॥**

**अतएवविधं कष्टं ज्ञात्वा जात्यंतरेपिवा।**

सभुक्तभागिनादीनों नात्रकार्यविचारणा ॥१८॥

अत जात्यान्तरऽपि एवविधं कष्टं ज्ञात्वा भकुत्भोग्यकालं निस्सार्य, अत्र विचारणा न कार्या।

**शूद्रं सोमेन सूर्येण गुरूणाभर्गवैन च।**

**राहुणा केतुनादृष्टो तदावैश्यांतकंश्रृणु॥ १९ ॥**

हे वैश्यान्तक शुद्र सोम सूर्य गुरू शुक्र राहु केतु इति ग्रहैः दृष्टस्यात् तदा किं फलं तत् श्रृणु

**अपेयीरनहारीच गुरूद्रोही कलापहृत्।**

**नीलपीस्वपचीर्गता विप्रहा गोघ्नाएव च ॥२०॥**

**स भवे द्विगुणं प्राप्तो विकलोवित्त वर्जितः।**

**क्षयी च रक्तपित्तश्च अपत्यरहितोप्रजाः ॥२१॥**

तस्मिन् जन्मे द्विगुणा विकल प्राप्तः वित्तवर्जितः क्षयरोगी, रक्त, पित्तरोगी, तथा पुत्ररहितः ज्ञेयः।

**निषादस्तुयदा वत्स सोमज्ञगुरूः भिभ्रशाम्।**

**राहुनाकेतुनादृष्टो भौमेन भृगुजेन वा॥ २२ ॥**

यदि चन्द्र वुध बृहस्तपतिभि व राहुकेतु भौम शुक्रभिः दृष्टश्चेत् तदा निषादः ज्ञेयः।

**तदापापं विजानीयात् विविधं कथयामिते।**

**विषादेनेकृतंवत्स यथासर्व विभागशः॥ २३ ॥**

हे वत्स विषादेनकृतं विविधं पापं विभागसहः यथा सर्व ते कथयामि तद विजानियात्।

**धूमिते देवतगारं स्त्रीणामयज्ञ संस्कृतम्।**

**विप्रदृष्टं तदाभग्नं अमृताहरणं कृतम्॥ २४॥**

**गोहरणं विप्रहंताच धातूनां हरणं तथा।**

**कृत्वातु च वधुनष्टो निषादोनात्रसंशय॥ २५॥**

सः निषादः गो हरणं धातुहरणं विप्रहत्या कृत्वा स्ववधुना एव संशयेन विना नष्टकृता।

**विगंधिर्विगतः श्रीकोविशालकुलसंभव।**

**नेत्रहीनो शिरो रोगी विप्रजः सर्वकष्टहा॥ २६॥**

विशाल कुलसम्भव श्रीमान् विशिष्ट प्रजावान् भूत्वाऽपि विगत विान्धि नेत्र रोगी शिरोरोगि कारणात् सर्वकष्टता अनुभुत्वान्।

**आत्मघातस्तु पापेन परिवारकृतोभवेत्।**

**आत्मघातात्समंपापं नभूतो न भविष्यति॥ २७॥**

पूर्व जन्मे आत्महत्या कृतत्वात् अस्मिन् जन्मे अपरिवारयुतः जातः। आत्महत्या समं पापं न भूतः तथा न भविष्यति अतः महा पापत्वात् आत्महत्या न कार्या।

**कारूसर्वात्मनावत्स सदृष्टो रविसनुना।**

**भौमेन भृगेजेनापि रविणागुरूणाथवा॥ २८॥**

**सोमेनसोमपुत्रेण केतुना सोममेनच।**

**अवेहि पापसंपूर्ण किंचित्पुण्य समन्वितम्॥ २९॥**

हे वत्स सर्वात्मनः शनैश्चर, भौम, शुक्र सूर्यः गुरू, चन्द्र, बुध, केतु, राहु, (नवग्रहाणां)। स्तुति कारू (करणीयम्) तेन ते सम्पूर्ण पापं किञ्चित् पुण्यसमन्वितम् अवेहि (रक्षेत्)।

**ब्रह्मघाती विप्रलुण्ठो तपस विप्रघातकृत्।**

**तेजस्वीनां द्रव्यहरो गुरूणावित्तलोपक :॥ ३०॥**

स ब्रह्मघाति विप्रलुष्ट तपसा विप्रघातकः तेजस्वीजनानां द्रव्यहर, गुरूणां वित्तहारकः ज्ञेयम्

**विप्रशीतगुणोपेत विधवागमनेन वा।**

**विदुषां वित्तहृत्शीघ्रं तस्यकर्मगतं श्रृणु॥ ३१॥**

हे विप्रशीतगुणोपेत य: विधवा गमनं करोति वा विदुषां विर्त्रहर्ता भवति तस्य कर्मगतं विपाकं श्रृणु।

**कुष्टीदरिद्री नि:शंक:विप्रजोवंशविश्लया।**
**विशिष्ट कुलसंजात शिशुघ्राणविवर्जिता॥ ३२॥**
**अंत्यवर्णारूपदा राहुणा चंद्रजे न तु।**
**शनैश्चरेण चद्रेण संदृष्ट: समसप्तम्॥ ३३॥**
**ब्राह्मणस्त्रीविकर्ताच बालघातीगवापि च।**
**तस्यकर्म विपाकं च श्रृणु त्वं कश्याप्तमज॥ ३४॥**

हे कश्यापात्मज य: ब्राह्मण स्त्रीविकर्ता वा वालघाती भवति तस्य कर्म विपाकं श्रृणु

**कष्टभाक्रमृतवत्सीको मृतवत्छकुलोभ्दव:।**
**कर्मणाजायतेवत्स स्त्रीतत्वं पुरूषोथवा॥ ३५॥**

स: स्व कर्मणा मृतवच्छ कुलोदभवो भुत्वा मृत वत्सीक: कष्टभाक् च भवति तथा स्व कर्मानुसारेण स्त्रीत्वं वा पुरूषत्वं प्राप्यते।

**।। अरूणोवाच।।**

**विशेषकर्मणां मेषं लक्षणानिचनिष्कृति।**
**पृथगालक्ष विधिवा विस्तरेण महाद्युते॥ ३६॥**

हे महाद्युते। विशेष कर्मणां लक्षणानि तथा निष्कृति पृथक- पृथके आलक्ष्य विधिना विस्तेरण कथय।

**कर्मतोवानदीज्ञान तिष्ठता भानुवंशका:।**
**विशेषतो व गंतव्यो नृ चतुष्पदपूर्वकै:॥ ३७॥**
**कर्मभावे सप्तमभावेपि जंतूनां जातिनिर्णय:।**
**यदुपायाधिमानानि हता: प्राणिन पुरा ॥ ३८॥**
**तद्रूपातद्दयोमान प्रियंते तस्यपुत्रिका।**
**एकं कुकर्मणि जाते प्रायश्चितं यथा चरेत्।। ३९॥**
**करणं चान्यकरणं यदि नानापिनातथा।**
**प्रमाणादाप्यकरणं तथामकरणंत्रिधा॥ ४०॥**

**अनेन विहिते कर्म अनेनकृत विशोधनम्।**
**पापं क्षयायनालंस्यात् कर्त्तृं प्रत्यूतभीतिम्॥ ४१॥**
**अरोगिणांकृतं पथ्यं औषधं दोषकृत्तथा।**
**रोगीणां न च रोगघ्नं प्रायश्चितं तथाभवेत्॥ ४२॥**

यथा अरोगिणां कृते औषधं दोषकृत भवति तथा रोगिणां कृते रोगहननं भवति। तथैव प्रायश्चितं भवति।

**नरस्वपृच्छतः सूतः स्त्रियोवाप्युभयोरथा। (अथवा इति शब्दः)**
**क्षितिजातस्यद्यूनात् कार्यकर्म प्रकाशितम्॥ ४३॥**

नरस्य पृच्छते सति तस्य सूत वा स्त्री विये व उभयेऽपि विषये भौमात् द्यूनस्थानं दृष्ट्वा तदनुसारं करणीय कर्म प्रकाशितव्यम्।

**ननुर्विच्यतयोर्वाच्यं जन्मतच्चततः स्ततः।**
**अतीतानागतंदेहि चिन्हाद्यमाखिलंच यत्॥ ४४॥**
**निगद्यनिर्विशीकेन प्राक्तन प्रत्यायवह।**
**अतीतजनुषं संख्या रव्यानामपिजन्मनाम्॥ ४५॥**
**तत्कर्मभादिनिश्चेयं अन्यतादि च लक्षणम्।**
**प्रतिवेश्मादयोप्येत ग्रहैतपरितस्थितैः॥ ४६॥**
**सहायानुकुर्वतः कर्मप्रतिवेश्मादिकान्वदेत्।**
**समदुः खानपत्यादौ बंधुभ्दुता यथारूचिः॥ ४७॥**
**कर्तुश्च जन्मसंख्यानं जन्माख्यं पूर्ववद्वदेत् ।**
**जननीबालजतश्च प्रवदेत् बंधुभावत॥ ४८॥**

कर्तुः जनसंख्या - जन्मना पूर्ववद् प्रवक्तव्यम् तथा जननी पुत्रादिनां स्थितिः बन्धुभावात् प्रवक्तव्यम्

**असंभवेन कुर्यात् नृ चतुष्पद बलेशया।**
**तस्माद्विश्लेषणे पापं चरराश्यादि भावत॥ ४९॥**

यदि द्विपाद चतुष्टपाद राशितः ग्रहादिनां बलावलं ज्ञातुं नशक्यते तदा चरराश्यादि भावेन जातकस्य पापस्य विश्लेषणं कर्तव्यम्।

**अथशल्यं अष्टविधं तु समयं समगारं तथाभासित संचयम्।**
**कपालंदारवं चास्थिशकलं चष्मलोष्टकम्॥ ५०॥**

**अशेषंशीर्षगं सत्यं पीड्येन्मर्मणिस्थितम्।**
**अन्यथा चार्थबाहुश्चदुरूपप्रमाणात्॥ ५१॥**
**पंचमेकादशे भौमे मृतापत्यंविनिर्दिशेत्।**
**शनिराहुच तत्रस्थौवंध्यावास्त्रवनस्युताः॥ ५३॥**

यदि पञ्चमस्थाने वा एकादशस्थाने भौमस्चेत् मृतापत्यं ज्ञेयं तथा तत्रैव शनि राहुश्चेत् तां स्त्रीयम् वन्ध्या वा स्रवत ज्ञेया।

**हिवुके भूमिजेचैव चतुर्थेशनिमेव च।**
**रवौचतुर्थाद्यं च राहु .. विनिर्दिशते॥ ५४॥**
**क्षितिजान् क्षितिजद्यनात् क्षितिजादृाष्टतादृशौ।**
**शनिनाधिष्टितादपि॥**
नचवाप्ति लव बहुगैः विज्ञेयो जंतु निश्चयः॥ ५५॥
**महापापेषु सर्वस्वं तदर्धमुपपातके।**
**दद्यात्पापेषु षष्टांशं कष्टं व्याधि बलावलंम्॥ ५६॥**

एतद् फलं महापापेषु सर्वस्वं उपपातकेषु अर्धं तथा पापेषु षष्टांश ग्रहाणां वालवलं ज्ञात्वा कष्टव्याधि ज्ञेयम्।

**जन्मजात्यादिकं सर्व प्रश्नभावे विचिंतयेत्।**
**प्रश्नभाद्द्वापिजंतूनां जातिनिर्णयकं वदेत्॥ ५७॥**

जातकस्य जन्मजात्यादिकं सर्वं प्रश्नभावे चिन्तनियम् जन्तुनां जाति निर्णयं प्रश्नभावात् वक्तव्यम्।

**यद्रूपायेद्दयोमान निहताः प्रणितः पुरा।**
**तद्रूपतद्दयोर्मानं म्रीयतेतस्यपुत्रिका॥ ५८॥**
**एवं कर्माणिते येन प्रायाश्चितं यथाचरेत्।**
**बकचटपयः नवाक्षराणि ज्ञातयः प्रकर्णएव च।। ५९॥**
**एवं प्रश्नप्रदातव्यं नरशाल्यं विनिर्दिशेत्।**
**सार्धप्रमाणमानेन मानसंमृत्युरेवच॥ ६०॥**
**आग्नेयां प्रश्ने पर शलांचैव प्रवर्ततेकरद्वयं च।**
**विज्ञेयं राजदंडस्तथैवच॥ ६१॥**
**याम्यांच प्रश्नयः शल्यं अंत्यज सततंस्मृतम्।**
**ततः स्वामिनोमृत्युं ज्ञापयेत्॥ कटिस्तथा ॥ ६२॥**

नैर्ऋत्यां चटकः प्रश्नेश्वानशल्यं क्रुजायते।
सार्धहस्तप्रमाणेन शोकसंतापकारकः॥ ६३॥
पश्चिमां चैवयः प्रश्ने शिशु शल्यं प्रवर्तते।
सार्धंचैव प्रमाणेन नरो स्वामिविनिर्दिशेत्॥ ६४॥
वायव्यांचैवयः प्रश्ने नराकारो च दुःष्करे।
उदीच्यां चैवयः प्रश्ने विप्रशल्यं तु दापेयत्॥ ६५॥
तच्द्दीध्वंनिनाशीय धनधान्यं च नान्यथा।
ईशान्यां च यदिप्रश्ने गोशल्यंच प्रजायते॥
सार्धहस्त प्रमाणेन शल्यं भवति निश्चितम्॥६७॥
गुरूसप्तमगः शुक्रोदशमेभुवनेयदि।
तदाविप्रंविजानीयात् पूर्व जन्मनि निश्चितम्॥ ६८॥

यदि गुरूसप्रमस्थाने स्यात् तदा शुक्र दशमस्थाने स्यात् तदा तं जातकं पूर्वजन्मनि निश्चयेन विप्रं विजानियात् ।

यदा च दशमः सूर्यो भौमोवापि चतुर्थगः।
तदा जन्मनि जानीतं क्षत्रियंतंमहाबलम्॥ ६९॥

यदा दशमस्थाने सूर्यश्चेत् वा भौमः चतुर्थस्थाने भवेत् तदा तं जातकं निश्चयेन पूर्वजन्मनि वलिष्ठं क्षत्रियं ज्ञेयम्।

दिनमणिगुरूलग्ने चेत् शोककरो भवेत्।
यदातदाक्षत्रयंतं पूर्व जन्मनिनिश्चितम्॥ ७०।।

यदि सूर्य तथा गुरू लग्नेस्यातां तथा लग्नेशः कर्कग भवेत् तदा तं जातकं पूर्वजन्मनि निश्चित् तथा क्षत्रीयः ज्ञेयः।

बुधचंद्रौयदाकेंद्रे केन्द्रेकस्थौविपर्यया।
पूर्वजन्मनि जातौस्यात् विधिवैश्यंपुराद्विजः॥ ७१॥

बुधचन्द्रौ यदि केद्रेस्यातां तथा केन्द्रकस्य विपर्यया स्यात् तदा द्विजेभ्यः तं जातकं पूर्वजन्मनि वैश्यः ज्ञेयः।

मूर्तौवा दशमे वापि यदिचंद्रो व्यवस्थितः।
न कश्चित् ग्रहकेद्रस्थो विद्धिशूद्रपुराद्विजः॥ ७२॥

यदि लग्ने वा दशमेस्थाने चन्द्रस्यात् तथा केन्द्रे कोऽपि ग्रहः नस्यात् तदा

विप्रेभ्यः तं जातकं शूद्र ज्ञेयः

**वर्णसंकर जातानां शनिस्वामिप्रकीर्तित।**

**सौरीचारकृताभ्दावात् तेषां जातिमतः श्रृणु॥ ७३॥**

वर्णशंकर जातिनां स्वामी शनित्वात् शनैश्चरेण कृत गमनभावात् वर्णशंकर जातिः श्रृणुः।

**शनिराहु यदा लग्ने तृतीये भुवनेरविः।**

**तदाहिरजकं प्रोक्तं श्रृणूध्वं कश्यपात्मज॥ ७४॥**

शनिराहौ यदा लग्नेस्याताम् तथा तृतीयस्थाने सूर्यश्चेत् तदा तं जातकं हिरजकं ज्ञेयम्।

**यावंतोभ्दय मेषे प्रयोजकः।**

**लग्नबलविचारेण ज्ञातव्यं च खगेश्र्वर॥ ७५॥**

**लग्नस्वामीषु संख्याच विज्ञेयाचदुपेक्षकः।**

**वयोजात्यादिकं तेषां ज्ञेयं तत्र ग्रहोदितम्॥ ७६॥**

**रहस्यमिदमाख्यातं कश्यपेयमयाधुना।**

**प्रश्नोयं जन्मजात्यादी विवेक ज्ञानमुत्तमम्॥ ७७॥**

हे कश्यपेय अधुनामया जन्मजात्यादि प्रश्न विषयकं उत्तमं ज्ञानं रहस्यं च उक्तम्।

**एवं तत्कालिकं पश्नं लग्नात्सर्वं विपश्र्चितः।**

**वक्तव्यं पृच्छयेत किमन्य श्रोतु मिच्छति॥ ७८॥**

हेकश्यपेय। एवं तात्कालिक (प्रश्न) लग्नात् मया सर्वं विपश्र्चितः त्वं अन्यत् किं श्रोतुमिच्द्दति ।

**इतिज्ञानभास्करे होरासार ग्रंथसंपूर्ण ॥ श्रुभंभवतु॥**

**संवत १६४० वर्ष चैत्रमासे कृष्णपक्षे द्वितीयां तिथौ चंद्रवासो इदं कर्मविपाक पठनार्थं भट्ट श्री नारायणदास ब्राह्मणेस्म ब्राह्नुपपरमानंदेन लिखितं॥**

श्रीमंतुगायकवाड़ सर्कार चे संस्कृत पुस्कालायलयस्थ। ग्रंथावरूण रामचंद्रय रावंत मराठेयाणीही प्रतीस्वार्थ परार्थालहिली।। मुकाम वडौदे मित्ती भाद्रपद शुक्ल ७ मंदवासरे प्रथम चारघटीका रात्री समाप्त शके १८०५ शोभनामसंवत्सरे संमत १९४० विक्रमार्क तारीख ८ सपटेंबर सन १९९३ इश्र्वी॥ श्रीरस्तु

॥ श्री सीतारामचंद्रचरणी निवेदितं॥

॥ श्रुभंभवतु॥

।। श्री गणेशाय नमः ।।

ज्ञानभास्कर

अरूणोवाच

सूर्यप्रनुत्वायलक्ष संशयं ममसाम्प्रतम्।
तदत्वंवद देवेशश्रवणकायां च जन्मनः॥१॥

हे सूर्यप्रभु। हे देवेश त्वया ममसम्प्रति संशयं आलक्ष्य जन्मनाश्रवणकायां में कथय।

।। श्री सूर्योवाच।।

तिथिवारं च नक्षत्रं योगंकरण च पृच्छकम्।
पथकस्य प्रीयायश्र्च नामैकत्रविधीयते॥२॥
तस्यअष्टगुणंकुर्यात तत्वराशीसमिन्वितम्।
चतुर्विंशतिहरेत भागंवर्णनां तत्रकल्पना॥ ३॥

तिथि-वार-नक्षत्र-योग-करण तथा पृच्छकस्य प्रियायाः नामाक्षर संख्या एकीकृत्य तस्याः संख्यायाः अष्टगुणंकृत्वा तत्राशिं सम्मिश्र्य चतुर्विंशति संख्यात भागं हरणेसति वर्णानां कल्पना भवति।

आदि अरूणोवाच

श्रीसूर्यमहाबाहो कमलज्ञं कथं भवेत्।

घटीकापलकथं ज्ञेयं क्रियायांत्वमहंकुरू॥ ४॥

श्री सूर्योवाच

संक्रांतेदिनेशेषेण तात्काल लग्नं स्पष्टं कृत्वाद्वादश।

साद्यं कुंडलीचक्र ते सद्यं गणकोत्तमैः॥ ५॥

रविमादौ ग्रहासवै स्पष्टंतुकारेयत्बुधैः।

येनलज्ञं स्पष्टंकृत्वा ग्रहालग्नैक स्थापयेत्॥ ६॥

येनलग्ने पृच्छकोयस्य तस्यपूर्वकर्मणाकथ्यते।

इहजन्मोप्रच्छकः येन जन्मवृतांत कथ्यते॥ ७।।

संक्रान्तेः शेषदिनंनित्वा तत्काल लग्नं स्पष्टं कृत्वा कुण्डली चक्रं ज्योतिर्विद्भिः निर्मितव्यंम्। सूर्यादि सवै ग्रहाः स्पष्टं कृत्य स्पष्ट लग्ने यथा स्थाने स्थापेयत्। एतावत् करणेसति यः लग्न आगच्छति तद्लग्नेन जातकस्य पूर्व जन्मस्य कर्माणि तथा इह जन्मवृतान्त वक्तुं शक्यते।

इतिलग्नस्पष्टप्रश्नः॥

।।अरूणोवाच।।

कश्यपोसुतमहाबुद्घे तेजोमय बुद्धीमान्भवेत।

संसारोहतकार्येन पूर्वकर्मसंचिता॥ ८॥

।। श्री सूयौवाच।।

प्रथमंमेषलग्नेनदिसा याश्र्चममुतमम्।

तन्मध्ये कच्छदेशश्र्चउदयतो ग्रामसोहागय॥ ९।।

विप्रज्ञाति उदिचौ सौभाग्यो गृहमुत्तमम।

अधिष्ठाता ज्ञाति विप्र प्रतापोज्ञातियेसदा॥१०॥

पूरमध्ये अधिकारा विप्रजनैः सर्वमाधीनता।

अधीनो अधिष्टाता च तनमंत्रा सदैवतम्॥११॥

तस्यवीप्रो अभिधानस्य आर्द्रायांजन्मनचेत्।

तस्यविप्रो महादाता सुशीलोचसदक्रिया॥१२॥

तस्यगृहे पुत्रमेकंस्यात् सुतायां त्रयमेव च।

जेष्ठपुत्रो विक्रमं कृत्वा इहजन्मेदु:खदायकम् ॥१३ ॥
तस्यपुत्रं अभिधानस्य पूर्वाषाढेन जन्मचेत् ।
गौरवर्णो विशालश्च्व चंचलोकामिकस्तथा ॥ १४ ॥
स्वातिभेजन्मभेतौ चैव पतिव्रता सुशीलका ।
बुद्धिमान गृह सौभाग्यं दातुर्यं च विशेषदा ॥ १५ ॥
द्वादशवर्षैपिताकष्टं षोडशवर्षेणमातुकष्टम् ।
वर्षैचतुर्द्दशे प्राप्ती पांणीग्रहणंकरिष्याति ॥१६ ॥
उत्तमकुलोगेहे नारीपतिव्रता स्वधर्मिणि ।
शरीरे पित्तरोगीच संताने चनि:फलम् ॥ १७ ॥
पूर्वैस्त्रीसुखंनास्ति स्वदेहो ग्रहमेवच ।
ग्राममध्ये सुखीवणीकोयं भाग्यशाली सदैवतम् ॥ १८ ॥
तस्यगृहे भगिनीमेकं वर्षेषोडशमेव च ।
नेत्रोदय गौरवर्णंच चंचलोघ्रिमेतारधि ॥१९ ॥
तस्यस्वामि महाध्येनो षटशास्त्रोयधीमताम् ।
तस्यग्रहे गतेविप्र स्त्रिसंगीकारये ध्रुवम् ॥ २० ॥
महाप्रीति कृतंस्त्रिणं निशायां च आगतागृहे ।
तस्य स्वामिमहासाधु शिरोखड्गेन छेदयेत् ॥ २१ ॥
तस्यभार्या स्वामिसंगेन अग्नीभक्षं करिष्यति ।
तस्यश्रापो पूर्वजन्मस्य इहजन्मे कष्टदायकम् ॥ २२ ॥
द्रव्यं सर्वविप्राणां म्लेच्छेन गृहं धनम् ।
ज्ञाति मध्ये प्रथकंयाति अधिकारो विनश्यति ॥२३ ॥
को दिवसेस्वयंग्रामस्य चौरकर्म रताय च ।
पुष्पकारो ग्रहे गावो दीयंते म्लेच्छाय हस्तयो: ॥
तेनपापेण क्षयरोगस्य इहजन्मे दु:खदायकम् ॥२४ ॥
इदं कथयति श्रीसूर्यस्य श्रोतव्यं अरूणोसदा ।
एतेपापैयपुरूषाणां स्त्रीकर्मणी कथ्यते ॥२५ ॥
पूर्वजन्मे गुर्जरदेशो नर्मदातीरमुत्तमम् ।
ह्मबरकाले ग्रामपुरीश्चैव जातीपूर्वेसूत्रधारक ॥
अभिधानो जेष्टायां जातो पूर्वभाग्यो धनेश्वरम् । ।२६ ॥

दोपुत्रौ पुत्री पंचसौजन्यो सुखदायकम् ।
मातुजन्मअश्र्वन्यां सधर्मग्रहणीस्तथा ॥ २७ ॥
तस्यपुत्री जेष्टस्य महापापै क्रतंपूर्व -
चतुर्विशतीवर्षेण महक्रोधोपजायते ॥ २८ ॥
स्वामीपूर समीपस्य गृहे कष्टं सदैवतम्।
स्वस्वामी सुखनास्ति संतानेन दु:खदा ॥ २९ ॥
स्वस्वामी हन्तास्त्रीयो परपुरूषो न आश्रवम्।
तस्यपुरूषो महादुष्टो ज्ञाति आहीरमेव च ॥३० ॥
ग्रहेषु गावोबहुलं अजाउष्टो वीशेषता।
स्वयं स्वामीविग्रहे नास्यं स्त्रीणां ग्रहदग्धकम्॥ ३१ ॥
गौवत्स पंचैकं अग्निमध्येच कष्टदा।
स्वयं आत्मा अग्निदग्धंच स्व हत्यांकरिष्यति ॥ ३२ ॥
तेन पापेन इहजन्मेन दु:खे प्राणे सदैवतम्।
पूर्व संचीतकर्मण जन्मसप्तोपिजायते ॥ ३३ ॥
पूर्व स्वामी स्वहत्या गौवत्श्यादि पंचकम्।
पूर्व प्रायश्र्चित् समोहं च धर्मे प्राप्ती सद: फलम्॥ ३४ ॥
पूर्वे स्वामि तीर्थानां नर्मदायां समागता।
नर्मदायां स्नानं कृत्वा वर्षत्रातिय संम्भव ॥ ३५ ॥
एकोपि दिवसे विप्रो आहीर गृहे गत्वा।
दधिदुग्धादि लिक्षयांचस्लीत्वा चतुर्थकम् ॥ ३६ ॥
अहीरो गृहसंपंन्नो एकाकिग्रहमेव च।
को दिवसे अहीरो मृतस्य गृहं धनं गृहतिविप्रय: ॥ ३७ ॥
नर्मदातीरे मृतो विप्रो इहजन्मे ज्ञातिमुत्तम्।
पूर्वसंचित्त कर्मणि इहजन्मेसपत्नीकम्॥ ३८ ॥
पूर्वजन्मे उभयो पापै इहजन्मे कर्मबंधनम्।
गृह वित्तने क्रतव्यं इहजन्मे सुखदायक ॥ ३९ ॥
हेमै: पंचदातव्या यथा क्रमेण कुर्वीत।
सवत्स धेनुमेकं हेय पत्नी यथाक्रमम्॥ ४० ॥
सप्तद्रोणानि दातव्यं सुख शय्यां च मामेकम् ।

वस्त्राणि दापयेत् विप्रो कूशमांड द्वादशस्तथा ॥ ४१ ॥
पिपलीका षट् मासानि ब्रह्मभोज्यं यथाक्रमम् ।
नित्यफलं च दातव्यं वांछित फलमान्पुयात् ॥ ४२ ॥
ताम्र कलशं यथाशक्यं मधुधृतादि पूरयेत् ।
यथा हेमै समर्पणं दातव्यं पात्रमुत्तमम् ॥ ४३ ॥
भौम व्रतोषड्मासानि वा थ वा दशकः ।
त्री गौमुखादि भोज्यंते अवाच्यं वृतयेत् फलम् ।
निशायां भूमि सेव्यायां श्रुचीदेहेन वांछीकं द्वौ पूर्व ॥ ४४ ॥

प्रथमं मेष लग्नेन दिशाप्रमुञ्चनं करोमि । अर्थात प्रथमं मेष लग्नं कथयामि । मेष लग्नश्चेत तं जातकं कच्छदेशस्य सोहागय ग्राम विप्रज्ञात्यां उत्तमगृहे सौभाग्येन प्रसूतः ज्ञेय । सः स्व प्रतापेन ज्ञात्याः अधिष्ठाता ज्ञेये । सः पूरमध्ये सर्वाधिकारी सन् विप्रजनस्य आधीनता तथा आधिनानां अधिष्ठाता । स्वभाग्यवशात् ज्ञेयम् । तस्यविप्रस्य पुत्रस्य आर्द्रायां जन्मः जातः । सः विप्रः महादाता शुशिलः तर्था सद्क्रियावान् आसीत् । तस्यगृहे सूतमेकं तथा कन्यात्रय आसन् । तथा तस्य कृतं अभिधानेन तस्य पुत्रो पूर्वाषाढा नक्षत्रे जातः । यतः गौरवर्ण-विशाल-चंचल तथा कामिक ज्ञेयः । स्वाति नक्षत्रे जातौ तौ प्रतिवृता-सुशील-बुद्धिमान तथा गृहे विशेष सौभाग्यदः ज्ञेयो । द्वादशेवर्षे पितृकष्टं तथा षोडश वर्षे मातुकष्टं प्राप्स्यति तथा चतुर्दशवर्षे पाणिग्रहणं करिष्यति । तथा सा नारि उत्तमकुलोत्पन्न पतिब्रता स्वधर्मिणी शरीरे पित्तरोगितथा सन्तान विषये निःफला ज्ञेया ।

पूर्व जन्मे सदैवतेन बुद्धिमान भाग्यशालिवणिकः आसीत् किंतु स्त्रीसुखं नासीत् । तथा तस्यगृहे एका षोडशवर्षिया नेत्रोदया गौरवर्णिया चंचला भगिनि आसीत् । तस्याः स्वामी महाध्येनि षट्शास्त्राणां ज्ञाता ज्ञेयो । तस्यगृहे गतो विप्र स्त्रीसंग करः आशन् । तस्यां रात्रौ तस्यस्वामीः येन स्व स्त्रीणां महाप्रितीकृतं आसीत् सः आगतवान् अतः विप्रेण तस्यस्वामेः खड्गेन शिरः छेदनं कृतम् । अतः तस्यभार्या स्वामीसह अग्नी भक्षाजाता । अतः तस्या पूर्व जन्मस्य श्रापः इह जन्मनी दुःखदायकः अस्ति । अनेन कारणेन तस्य धनं म्लेच्छेन गृहितम् । ज्ञाति मध्ये पृथक याति अतः ज्ञातिमध्ये अधिकारः विनश्यति । कस्मिन्चित् दिने स्व ग्रामे पूर्व चौरकर्म कृताय पुष्पकाग्राय गां म्लेच्छहस्तयोः दत्ता । तेन पापेन इह

जन्मनी क्षयरोग:दु:खदायक: । श्री सूर्य: इदं श्रोतव्यम् अरूणमं कथयति । एतै पापै पुरूषाणां कर्मगति भवता ज्ञर्या । अधुना स्त्रीणां कर्माणि श्रुणु -

पूर्व जन्मे गुर्जरदेशीय नर्मदातीरस्थ बरकाले ह्यस्थानं ग्राम एवं पुरी वर्तत्रे तत्र सूत्रधारक जात्यां अभिधानत्वात् जेष्ठायां जात: । पूर्व भाग्यात् इह जन्मनि तस्यगृहे पुत्रद्वयं तथा पञ्च कन्यानां सुखभोगि धनेश्र्वरो ज्ञेयो । तस्य मातु: जन्म वा भार्याया: जन्म अविश्न्यां चेत् तस्य महापापै: ये पूर्वैकृतम् चतुर्विंशति वर्षे जेष्ठपुत्री महाक्रोधं करिष्यति । स्वामीपूर समिपस्य गृहे भाग्गेन बन्धुकष्टं आसीत् । तस्य स्वामीसुखंनासीत् तथा च सन्तान विषयेपि दु:ख आसीत् । तस्यपुरूष: आहीर जातीय् महादुष्ट: आसीत् तस्यगृहे विपुल गाव: तथा विशेषतया अजाउष्ट्र: आशन् । तस्य स्वयं स्वामिवग्रहेन स्त्री तथा गृहदग्धक: ज्ञेय । तस्मिन् दाहे पञ्चगो वच्द् मृता अत: स्वयमपि अग्निदाहेन आत्महत्यां करिष्यति तेन पापेन अस्मिन् जन्मे भाग्यवशात दु:खी प्राण: । पूर्व सञ्चित कर्मेण वत्सादिनां हत्या करणत्वात् पूर्व प्रायश्र्चित्तेन तस्य धर्मे प्राप्ति जात । तथा सदफलियं कार्यं पूर्व स्वामी तिर्थानां नर्मदायां आनयित्वा नर्मदायां स्नानं कृतम् । तत्पश्चात् वर्षत्रायन्तरं एकस्मिन दिने स विप्र: अहिरस्य गृहं गत्वा दधि दुग्धादिनां भिक्षां कृत्वा स: अहिर: एकांकि तथा तस्यगृहाऽपि एकांकि आसीत् । तथा स: अहिर एकस्मिन् दिन मृतस्य धनं तथा गृहं प्रयत्नेन गृहित । नर्मदा तटे मृत स: विप्र: स्वपूर्व संचित कर्मेण इह जन्मनि उत्तमज्ञातौ सपत्निक: जात: । पूर्वजन्मे उभयो: पापै: इह जन्मे कर्मवन्धनं जातम् अत: गृहे स्ववित्तेन क्रतव्यम् अत: इह जन्मनी सु:खदायक भवेत । तेन स्वर्गिय पञ्चस्वच्सा धेनु तथा पत्नी हत्या कृतपापाय सप्तद्रोण परिमिता धान्यदानेन सुखं प्राप्स्यति । पिप्पलिका तथा ब्राह्मण भोजनम् षड्माषपर्यन्तम् कारयित्वा नित्य फलदानकरणे सति वाञ्छीतं फलं प्राप्स्यति । तथा यथाशक्यं तामक्रकलशान् मधुधृतै: पूरयित्वा यथा हृदयेण देयम् ।

**इतिकर्म विपाके सूर्यारूणव संवादे मेष लग्ने संचित कर्म कथ्यते ।**

### अथवृषभलग्नफलम्

**।। श्री सूर्यौवाच ।।**

**अथवर्षलग्न प्रवक्षामिश्रोतव्यं अरूणस्तथा ॥**

हे अरूण। अथ वृषलग्नं प्रवक्षामि यत्वया श्रोतब्यम्।।

श्री सूर्यौवाच

पूर्वादौ लग्नस्पष्टं कृतं तेन द्वादशभुवनेन खेचरास्थापनं कुर्यात्॥

यस्यभुवने यस्यगृही तस्य फलानि विलोकयेत्॥ १ ॥

जन्मभूमि कुंकणदेशे च पूर्वे वणिकोज्ञाति च देशाधिपति च ज्ञायते।

अश्र्वरथो बहूत्राणि लक्ष्मीवान् जायते।

पंचखड्गोपहतमपूरो गृहे एकाकीमेव च॥

गृहेविष्णु पूजा च वैष्णव वणिको व्यापोर धना सर्वानि ग्रहाया॥

सुख संपदं पूर्वे सन्रोहन्यं कुलधर्मो च लोपयेत्॥

वणिकश्र्च महादुष्टो दुष्टवत्वआचरेत्।

वणिकेन प्रसंगेन मालिनि गृह आगता च॥

माल्यानि बहुलं गौर वर्णे कटाक्षकम्।

षोडश वर्षाणि प्राप्यंते स्वामीयो वधंकुरू॥१०॥

व्यषयेन भोजनेब्यंसदैः प्रागतैः रपि।

निशायेतु गताप्रांणा स्वगृहे स्वयं समर्पणम्॥११॥

तस्य मालनि विधवायां संवत्सरद्वयमेव च।

वणिकेन प्रसंगेन गत्वा देशांतरं मयी॥१२॥

हरिद्वारे स्वयं गत्वा वर्षे द्वादश संस्थिता।

विप्रस्य द्वौ पुत्रौ च गंगातटेन आगता॥१३॥

एकवर्षमष्टमं च द्वितीयो वर्षाणि एकादश।

हस्ताभर्णकर्णश्र्चैव कटिबंधेन वस्त्रकम्॥ १४॥

सुशीलो ब्रह्मपुत्रस्य सांमवेदस्य पाठकः।

धीमानो द्वौ च पुत्रौ च नित्येयं स्नानकारकौ॥ १५॥

एकोपि दिवसे वणीको स्वपत्नीसहित आगता।

बालकौ ब्रह्मपुत्रस्य वस्त्रक्षणय ब्रवीत्॥ १६॥

पिशाचौ वणिको येन दुष्टकर्मसमाचरेत्।

द्वौ भ्रातरौ जलं धृत्वा सदाप्राणगतैरपि॥ १७॥

उभयोः कर्मकर्त्ताच इहजन्मे दुखदायकः।

पूर्व पापसमोहंच धर्मेणापि विमुक्तयेत्॥ १८॥

पूर्वजन्मे पुष्पकाणी च इहजन्मे सपत्नीकम्।
सदैव स्नान गंगायां इहजन्मे ज्ञातिमुतमम्॥ १९॥
पूर्वसंचित कमैणि इहजन्मेनि फलं भवेत्।
त्रयो हेमं च दातव्यं सद्वत्सम् धेनुमेककम् ॥ २०॥
तीर्थस्नानं उभयोकृत्वा यथावित्तेन सवस्त्रकम्।
ब्रह्मभोज्यं यथाशक्यं फलं प्राप्नोतिसद्य च ॥ २१॥
शनैब्रतं षटमासानि पूजको कपीलकम् ।
उद्यापनो यथाशक्ति फलं प्राप्नोतिवांछितम्॥ २२॥
स्वयंवस्त्राणि देयंस्यात् भक्तिपूर्वेणदापयेत्।
ताम्र कलशो यथा शक्त्यं पूरितं धृतमेव च॥ २३॥
समर्पणं हेमकुम्भेन वांछितं पुत्रपौत्रकम् ।
इहजन्मे मालीस्त्रीयो जन्मपंच च जायते॥ २४॥
इहजन्मे पुत्रहीनस्य पूर्वे पुत्राणि च हन्यते।
ब्रह्महत्या द्वयोहस्ते पूर्वकर्म संचितम्॥ २५॥
कौशमांड द्वादशश्चैव नित्यफलानिदापयेत्।
कुमारीका त्रय भोज्यानि सीमंत स्त्री पूजकम्॥ २६॥
तद्मुच्छिष्टम् अन्नेन भक्षंकुर्वंति सदःफलम्।
गर्भस्त्री पुज्यंते पुष्पाणी कुंकुमस्तथा।। २७॥
मुदकं ग्रहविप्रेण मासेत्रयो दशकस्तदा।
पंचवस्त्राणि बालके यथाशक्ति च भूषणम्॥ २८॥
यद रत्नग्रहे चक्रे देयं ते विप्रहस्तयो।
मृद में समो विशेषेण बहुविप्रेण दापयेत्॥ २९॥
एवं पुण्येनकृतेन प्राप्यंते द्वौ पुत्रकौ।
एका पुत्री आगता सद्यः प्राणस्य जायते॥ ३०॥
द्वि पुत्रेण सुखंयस्य विश्र्वासेन समर्पणम्।
मनसा वाचाकृतेन पुरूषोवांच्छितं फलमुत्तमम्॥ ३१॥

पूर्वे लग्नंस्पष्टं कृत्वा द्वादश भुवने ग्रहाणां स्थापना करणीया। तथा तेन

भुवनेश तथा भुवनग्राही दृष्ट्वा फलानि वक्तव्यानि। पूर्वे कुंकणदेशे वणिक ज्ञातौ देशाधिपति जातः। वहु अश्वरथयुक्तः लक्ष्मीवान् किन्तु एकाकी आसीत्। सः वणिकगृहे विष्णु पूजांकृत्वा व्यापारे बहुधनं आर्जितम्। सुख-सम्पद प्राप्त्वा सः वणिकः दुष्टतत्वान् आचरयन् महादुष्टो जातः। एतत् सर्वं दृष्ट्वा एकामालिनि वणिकगृहे आगता। सा मालिनी गौरवर्णिया कटाक्षिया आसीत्। षोडशवर्षानन्तरं तथा सायंकाले स्वामिनं विषयुक्त भोजनं दत्तवती। तस्यामेव निशायां तस्यस्वामेः प्राणग्रताः सा मालिनि विधवावस्थायां वर्षद्वयानन्तरं देशान्तरंकृत्वा हरिद्वारे गतवति। तत्र द्वादशवर्ष पर्यन्तं निवसित्वाति एकदा तत्र गंगातटे विप्रस्य द्वौ पुत्रो आगत वन्तौ। एकः अष्टवर्षिय तथा द्वितीय एकादश वर्षिय आसीत्। हस्तभर्ण कर्ण कटिवन्धन वस्त्रेण च तौ सुशिलौ धीमानौ च आस्तां तथा तौ सामवेद पाठकौ, नित्य गंगायां स्नान कारकौ आस्तां। एकस्मिन् दिने स पिशाच भूतः वणिकः स्व पत्नीस्थानं आगत। तथा तत्र उभौभ्रातरौ जलेनिमज्य मारितवान्। उभौ कर्मकर्ता सः विणकः इह जन्मे दुःखी अस्ति। पूर्व जन्मस्य पापसमूहात् धर्मेणाऽपि विमुञ्चयितुं न शक्यते पूर्व सञ्चितकर्मानुसारं इह जन्मे फलं भवति।

सवत्सा धेनुमेकां तथा हेमत्रय दानं कर्तव्यम् तीर्थस्नानान्तरं यथावित्तेन सवस्त्रक ब्राह्मण भोजन करणेसति सत्फलं प्राप्नोति। षड्मास पर्यन्तं शनिव्रतं तथा कपिलापूजनं कृत्वा यथाशक्ति उद्यापनं करणे वांच्छितं फलं प्राप्यते। स्वहस्तेन यथाशक्ति वस्त्र एवं धृतपूर्ण ताम्रकलश भक्तिपूर्व दापेयत्। तथा सुवर्णकुम्भदानेन पुत्रपौत्रादि वाच्छित फलं प्राप्नोति। पूर्व जन्मेकृत विप्रपुत्राणां हत्याकारणेन इह जन्मे पुत्ररहितः ज्ञेय। तस्य प्रायश्चित्यर्थं द्वादश कुष्माण्ड तथा नित्य फलदानं कर्तव्यम। कुमारिकाः त्रय भोज्यानि तथा सिमंत स्त्रीणां पूजनं कृत्वा तेषां उच्छिष्ट भोजनं भुङ ते सति सत्फलं प्राप्नोति। कुम्कुम पुष्पाभ्यां गर्भवति स्त्रीणां पूजनं तथा तयोदशमास पर्यन्तं त्रिणीपञ्च वा वालकान् आभूषणैः पूजनीयम्।

एतादृशं पुण्यकृते सति पुत्रद्वयं तथा एकस्याः कन्याः प्राप्ति जायते। विश्वासेन सर्मपण भावनाया मनसा तथा वाचा कृतपुण्योदयेन वाच्छितफलं प्राप्त्वा द्वाभ्यां पुत्राभ्यां सःसुख माप्नुयात्।

**इतिश्री कर्मविपाके सूर्याण संवादेवर्षलग्ने संचित्तकर्म कथनं॥**

अथ मिथुनलग्नफलम्

श्री सूर्योवाच

अथमिथुन लग्नप्रविक्ष्यामि श्रोतव्यं अरूणस्तथा॥

हे अरूण अधुना मिथुनलग्नफलं कथयामि तत् त्वया श्रुतव्यम्।

श्री सूर्योवाच

पूर्वआदौलग्नंस्पष्टंकृतम्॥

तेन द्वादश भुवनेन खेचर स्थापनं कुर्यात्॥

यस्य भुवने यस्य ग्रहा तस्यफलानि विलोकयेत्॥ १ ॥

दक्षिण समीपे आग्नेयां तस्य जन्म विलोकयेत्।

जन्मभूमि पुरोनाम भगवद्दतममेवाससम्॥ २ ॥

ब्राह्मणजाति तैलंगदेशाधिपति च जायते।

अश्र्वरथो बहुत्राणिलक्ष्मीपारोभिजायते॥ ३ ॥

पंचषड्गो महत्त श्रूरो प्रतापि तस्य देशकम्।

ब्रह्मभोज्य गृहे विप्रो संवत्सरेण लक्षकम्॥

तस्यविप्रो अभिधानस्य रत्न राजो नवाडवो।।

तस्यविप्रो महादाता याचक दीयते उग्रबुद्धि।

महातेजो वंशमध्ये च दीपकः॥ ५ ॥

कुटुंब पालको येन शास्त्रयुक्तो च धीमता।

षट्वीता सप्तसिंधु चतुर्विधेन संयुतम्॥ ६ ॥

तस्यगृहे साध्वीमेका पतिब्रताच स्वधर्मणी।

तस्यानाम यशोदां स्वामिभक्ति सदाभवेत्॥ ७ ॥

प्रसवो पंचपुत्रस्य महावीरो सुस्थदायकः।

को वर्षे जनको नाश साधु पुष्पेण मष्मकम्॥ ८ ॥

माता को दिवसे गत्वा द्वयवर्षैण अंतरे।

पश्र्चात् पंचसुतायेन विरोधंकरायेत् ध्रुवम॥ ९ ॥

कनिष्ट पुत्रकृतम् कर्म जेष्ठभ्रातेन हन्यते।

तां स्व भ्रातो साध्वी च अग्निभक्षेण करिष्यति॥ १० ॥

तस्यां उदरे गर्भमेकं द्वौ हत्यां करिष्यति।

अपर भ्राताात्रयंचैव बधुसंस्कार करिष्याति॥ ११ ॥
पूर्वजन्मो अभिधानस्य केशवोः नामधारकम्।
तस्यविप्रो केशवोयत् ग्रामदग्धं करिष्यति॥ १२ ॥
कोटिजीव सहस्राणां अग्निदग्धेन पाचयेत्।
धेनौयुग्म व सवत्साणां षडको अंधकःस्तथा॥ १३ ॥
पूर्वकुमार जातस्य विवाहेप्यवलंतथा।
पांणिग्रहणं कृतं नास्ति हरेतकन्या च सद्ययम्॥ १४ ॥
कन्यायां गृहे विप्रो कोपिदेशान्तरेगतः।
पश्च्मिे द्वारकादेश गोमती तीरमाश्रयम्॥ १५ ॥
कुमारगृहेण शिरोस्थि छित्वा तस्यपापै कृतं ध्रुवम्।
तस्य संताने उदरे संतानं नास्ति स्त्रि श्रापेण निःफला॥ १६ ॥
पूर्वकुमारि इहजन्मे स्त्रियो दुष्पापेण निफलम्।
श्रापौसताणां च इहजन्मे दुःखदायकः॥ १७ ॥
हेमस्त्रिकृतंशक्तं पंचवस्त्राणि समर्पणम्।
हेमगभौशतेन क्रतव्यं शास्त्रयुक्तेन कारयेत्॥ १८ ॥
कौशमंडं षोडश द्वयं वंशपात्र समर्पणम्।
पूर्व पापै समोहं च दातव्यं हेमचतुर्थकम्॥ १९ ॥

सद्पात्रेण दातव्यं फलं प्राप्नोति सद्ययः।
द्वौगावो सवत्सं च दातव्यं सदक्षिणम्॥ २० ॥
महीषी दानानि क्रतव्यं पंचद्रोणस्तथैवचः।
ब्रह्मभोज्यम् यथाशक्त्यं पुष्यते सपत्निकम् ॥ २१ ॥
सूर्य व्रत षट मासानिक्रतव्यं मनसोचिते।
प्रसंन्नो रविस्वामी वंशोवर्धयती सद्ययम्॥ २२ ॥
सुखसेय्या च दातव्यं यथाशत्या समर्पणम्।
एतानि पूर्व कर्माणि इहजन्मे कथ्यते ध्रुवम्॥ २३ ॥
इति कथयति श्री सूर्यः श्रोतव्यं अरूणस्तदा॥

पूर्ववत लग्नस्पष्टं कृत्वा द्वादशभुवनेषु ग्रहस्थापनं कृत्वा यस्य भुवने ये ग्रहा: तदनुसारं फलं कथनीयम्। पूर्वे भगोदत्तपूरे ब्राह्मण ज्ञातौ तिलंगदेशाधिपति जात:। तस्य गृहे बहु अश्वरथा: आसन् तथा स: पञ्चखण्ड महान् शूर: प्रतापि आसीत्। तस्यगृहे अभिधानस्य सम्वत्सरान्तरेण रत्नराज: पुत्र: जात:। स: महादाता, उग्रबुद्धि महातेजी तथा वंशे दीपकरूप: आसीत्। तस्य कुटुम्बपालकस्य शास्त्रयुक्तस्य धीमत: विप्रस्य गृहे यशोदा नामी स्वधर्मिणि स्वाध्वीरूप पतिव्रता स्त्री आसीत्। तस्यगृहे सुस्थदायक महावीर पञ्चपुत्रा: प्रसूता:।

कस्मिन वर्षे जनकस्य नाथ: इति पृष्ठेसति उत्तरीयतेयत् मातु मरणान्तरं वर्षद्वायाभ्यां जनकस्य मृत्यु ज्ञेयं, तदनन्तरं पञ्चसुता परस्परं ध्रुवत्वेन विरोधं करिष्यन्ति। तं विरोधे कनिष्ठ पुत्र: जेष्ठपुत्रं हनिष्यति। ततदृष्ट्वा जेष्ठ पुत्र पत्नी अपि अस्ति तदपि विनश्यति तथा अपर भ्राता त्रयं जेष्ठभ्रातु: उत्तरक्रियां करिष्यन्ति। पूर्वजन्मे केशवनाम धारको विप्र ग्रामदग्धं कृत्वा। तस्मिन दाहे सहस्रकोटि जीवनां हत्या अभवत्।

पूर्वे कुमारेण कन्याया: विवाह प्रसंगे पाणिग्रहणात पूर्वै कन्याहरणं कृतम् तथा कन्ययासह गोमती तिरस्थ द्वारकायां देशान्तरं कृतम्। तस्य कुमारस्य शिरच्छेदेनपापात् सा स्त्री श्रापेण नि:फलाजाता तथा इह जन्मेऽपि पूर्वकृतपापकारणात् नि:फला जाता। अत: पूर्वजन्मस्य पाप: इह जन्मेऽपि दु:खदायक: शक्तिस्चेत् हेमस्त्री तथा पञ्चवस्त्राणां समर्पणं करणीयम्।

असक्तौ हेमगर्भेण स्त्री कर्तव्या इति शास्त्रवचनम्। षोडश कौशमाण्ड वंशपात्रद्वयम् हेमं सद्पात्राय पूर्वपाप विनाशाय दानं कृतेसति निश्चित रूपये फलं प्राप्नोति। तथा दौ गावौ सवच्छकं सदक्षिणकं तथा महिषीदानं, ब्राह्मण भोजनं इत्यादि सपत्निकेन पुण्यवर्धनार्थ यथा शक्यं कर्तव्यम्। षड्मास पर्यन्तं सूर्यव्रत कर्तव्यम् तेन प्रशन्नसूर्य: वंशवृद्धिं निश्चिततया करिष्यति। यथाशक्त्या सुखशय्यादानमपि करणीयम्। इति मयापूर्वकर्माणि कथितम्।

**इतिश्री मिथुनलग्नम् समाप्तम्॥**

**।। अथकर्कलग्नफलम्।।**

**श्री सूर्योवाच**

कर्कलग्नं कथयत पूर्वकर्मश्च कथ्यते।
पूर्वे वारणस्यां जन्म भाग्यशालिस्तथैव च॥ १॥
सुवर्णकारोज्ञातिश्च स्वधर्मोसुखदायकः।
पञ्चभ्रातोसुखिमेकं लक्ष्मियुक्तो सदैवतम्॥ २॥
प्रतापी ज्ञाति सर्वेश भार्याद्वय संम्भवम्।
प्रथम भार्या पुत्रहीनस्य द्वितीयेन पुत्रद्वयम्।
हेमकारो-अभिधानस्य जन्मपुण्येन मेवच॥ ३॥
तस्य द्वि पुत्रो द्वयंजाता गौर वर्णे च धीमता।
ज्येष्ठपुत्रेण कृतं पापं इहजन्मेदुःखदायकः॥ ४॥
मघाजन्मेन मातुश्च सुखंसौभाग्यपूर्णता॥ ५॥
तस्यपुत्रो महत्त श्रूरो दुरसंगो बुद्धिहीनता।
स्वयं स्त्रिपरहर्ता च दुष्ट बुद्धि च आचरेत्॥ ६॥
समपिगृहेविप्रस्य सौभाग्येगृहमुत्तमम्।
अयाचको विप्रोयेन सन्तानो गृह दुःखदा॥ ७॥
एकपुत्रो गृहे विप्रो गौर वर्णेन चंचलो।
विधवा जन्मतो पुत्री षोडश वर्षिणि धीमता॥ ८॥
सपूर्व गतो हेंमौ विप्राणां ग्रहमाश्रयम्।
वेदाध्ययनकृतो विप्र गृहे पत्नी सुबुद्धिदा।। ९।।
एकोपि दिवसे पुत्री गंगायां स्नानमुत्तमम्।
पश्चात् हेमाकारस्य स्नानार्थं ज्ञान मुत्तमम्॥ १०॥
उभयो स्नानगंगायां क्रर्तव्यं शीवअर्चनम्।
शिवालये उभौगत्वा दुष्टकर्म समाचेरत्॥११॥
एकविप्रो स्वजातिनां आगतश्च शिवार्चने।
तेन दृष्ट्वा पापिष्टो दुष्टकर्म कृतेध्रुवम्॥१२॥
ज्ञातिमध्ये विप्रोयं वक्तव्यं सर्वोपायम्।
तस्यविप्रो वेदपात्रस्य ज्ञातिमध्ये विसर्जनम्॥ १३॥
तस्यविप्रो हेमकारस्य नायातो गृहमुत्तमम्।
उदरे षडगानी क्रतव्यं सद्य प्राणगतं ध्रुवम्॥ १४॥
विप्रगृहे पतिव्रता च पश्चात् अग्नीभक्षकम् ।

तत् श्रापो इहजन्म च दुखं प्राप्नोति सदैवतम्॥ १५ ॥
विप्रपुत्रि भाग्यवंति आत्मघातं करिष्यंति।
हेमकारो महादुष्टो बंधनंम्लेच्छे मंदिरे ॥ १६ ॥
षट्मास बंधनं हेम विक्रमो यतितस्तथा।
मुक्त बंधनकृते हेमे कुरूक्षेत्रेण आगता ॥१७ ॥
भस्मलेपो कृते हेमो तीर्थचारि प्रदक्षिणम्।
स्वगुरूणां कृतंकपटं मात्रायां सर्वमग्रहे ॥१८ ॥
गुरूलोपी पूर्व जन्मस्य पंचजन्मानि दुःखदा।
पूर्वजन्मे विप्रपुत्रि च इहजन्मे सपत्निकम् ॥ २० ॥
यथावित्तेन दानेन पूर्व प्राप्नोति मुत्तमम्।
सुवर्ण त्रयदातव्यं ग्रह वि तेनक्रतव्यंस्तथा ॥२० ॥
पूर्वजन्मे स्त्रि हत्यायां ब्रह्महत्याच विशेषतः।
तेनपापेन मुक्तोयं यथा दानेन मुत्तमम् ॥२१ ॥
हेमास्त्रि द्वयंक्रतव्यं हेमपुरूषस्तथाविधि।
गुरूणा पूर्व दोषस्य इहजन्मे पि शुद्धयम्॥ २२ ॥
सप्तद्रोणानि दियंते सवत्सा धेनुमेककम् ।
कौशमाडं सप्तदीयंते नित्यफलानि च दापयेत्॥ २३ ॥
पिंपलिकाषटमासानि इहजन्मे सुखदायकम् ।
ब्राह्मणामुदकं देयं षट्मासानिमनोचयम्॥ २४ ॥
नर्मदास्नानं उभयोकृत्वा सवस्त्रम् मनसोदयम्।
ब्रह्मभोज्यं यथाशक्यं उमामेकं स्तथैवच॥ २५ ॥
उभयोवस्त्राणि देयं स्यात् फलं प्राप्नोति सद्ययम्।
सुख सय्या ब्रह्मपुरिश्चैव क्रर्तव्यं उभयोस्तदा॥ २६ ॥
वंशप्राप्ति द्वौ पुत्राणां सुतामेकं च निश्चयम्।
भौमव्रत षट्मासानि क्रतव्यं समाचरेत् ॥ २७ ॥
एवं कृतेन पुण्येन वंशोवर्द्धयतिनिश्चयम् ।
यथा दानेन विश्वासो सद्यःफलंति मद्ध्रुवम्॥ २८ ॥

कर्कलग्नं कथयत सूर्यः पूर्व कर्माणि कथ्यते। पूर्वे वाराणस्यां सुवर्णकर ज्ञात्यां जन्मः जातः महाभाग्यशाली सधर्मि सुखदायक सुवर्णकारः पञ्चभ्राता युतः सौभाग्येन लक्ष्मीवान् आसीत्। तस्यगृहे भार्याद्वयम आसीत्। प्रथम भार्या पुत्रहीना तथा द्वितीय पुत्रद्वययुता आसीत्। तथा पुत्रद्वयस्य जन्मः पुण्येन जातः। तस्यपुत्रद्वयम गौरवर्णीयौ तथा बुद्धिमन्तौ आस्तां। जेष्ठपुत्रेणकृतम पापं अस्मिन जन्मे दुःखदायक अस्ति।

मघानक्षत्रेण जातः जेष्ठ पुत्रः मातु कृते सुख सौभाग्यदायकः भवति। तथा स्वयं शूरः दुःसंगी बुद्धिहीन तथा दुष्टकर्मकर्ता भवति। तस्यगृहसमीपे एकः अयाचकः सौभाग्यवान् तथा अपुत्रीय विप्र आसीत्। तस्यगृहे षोडशवर्षीया धीमति गौरवर्णीया चंचला पुत्रीआसीत्। सः सुवर्णकारः एकस्मीन् वेदाध्यनकरणरत विप्रस्यगृहे आश्रियत्ववान्। विप्रस्य पत्नी, सुबुद्धिपुत्र आसीत्। एकस्मिन् दिने विप्रस्य पुत्री गंगायां स्नानरतआसीत् तदा एव सुवर्णकारः स्नानार्थं गतः। उभयो स्नानंकृत्वा शिवाचनार्थं शिवालये गतवन्तौ। तथा तत्रैव दुष्टकर्म कृतम्। तस्मिन एव काले एकविप्रः शिवाचनार्थं तत्रैव आगत। तेन उभयो पापिष्ठकर्म दृष्टम्। तेन कन्यापिता वेद पात्रविप्रस्य ज्ञातिमध्ये विसर्जनं जातम्। तत्पश्चात सःविप्रः सुवर्णकारस्य गृहे आगत्वा स्वउदरे घातं कृत्वा प्राणान् त्यक्तवान्। तस्य पतिव्रतास्त्री अपि तेन सह एवं अग्नीभक्षाजाता। तस्याः विप्रपत्न्याः श्रापं इह जन्मे दुःखदायकः। विप्रस्यपुत्री अपि आत्महत्यां कृतवति। महादुष्ट हेमकार षड्मास पर्यन्तं कारगृहे वन्दिरूपेण जीवयित्वा पुनरागतः तदा तस्यहेमविक्रयः पतितः।

तदनन्तरं सः कुरूक्षेत्रं आगत्य भास्मालेपोकृत्वा स्वगुरूकृत् कपटदोष निवारणं कृत्वा तीर्थयात्रां कृतवान। पूर्वजन्मे गुरूलोपीसः हेमकार पञ्चजन्मपर्यन्तं दुःखीभवति। तथा पूर्वजन्मे या विप्र पुत्री आसीत् सा एवं इह जन्मे पत्नीरूपेण प्राप्यते।

पूर्वजन्मकृत पाप निवारणार्थं सुवर्णत्रयस्य दानं गृहवित्ते कर्तव्यम्। पूर्व जन्मे स्त्रीद्वयहत्या तथा ब्रह्महत्याकृताऽस्ति। अतः हेमद्वयं स्त्रीयै तथा एकं पुरूषाय दातव्यम्। सप्तद्रोण परिमितं धान्यं दत्वा, सवत्सधेनुदेया। सप्तकौशमाण्डापि देयम्। तथा नित्यफलानि देय। षड्मास पर्यन्तं पिप्पलिकाभ्य अन्नं तथा ब्राह्मणेभ्यो उदकदानं कृत्वा नर्मदायां सपत्निकं स्नानं कृत्वा ब्राह्मणेभ्यो मनसेचितं स्वस्त्रभोजनं दत्वा

उमायाः पूजां करणीया। तथा उभयो वस्त्राणि अपिदेयम्। पश्चात् सप्तमास पर्यन्तं भौमव्रत करणेसति निश्चेयन पुत्रद्वयस्य प्राप्तिः तथा एकाकन्यायाः प्राप्ती भविष्यति। एवं विश्वासपूर्वक कृतेन पुण्येन दानेन च निश्चयेन सद्यः फलं लभते तथा वंशवृद्धिं भवति।

**इतिश्री कर्मविपाके सूर्यार्णव संवादे कर्कलग्नेकथ्यते।**

**।। अथसिंहलग्नफलम्।।**

**श्री अरूणोवाच**

**सूर्यस्वामिमहाबाहो संसारोत्तमहेतवे।**
**फलं च सिंहलग्नस्य वक्तव्यं च दिवाकर॥ १॥**

हे दिवाकर। हे सूर्य। महावाहो संसारहिताय सिंहलग्नस्य फलं कथय।

**श्री सूर्योवाच॥**

**कुंकणोपूर्वदेशानां नवसारिपुरमेवच।**
**रजको पूर्व ज्ञातिषु सदावत्रैव गृहमेव च॥ २॥**
**अश्वन्यां जन्मभे जाता सुशीलो कुशलक्रिया।**
**एकपुत्रो स्वदेहे च गौरवर्णोसुबुद्धिमान्॥ ३॥**
**हस्तेन जन्मतोपुत्रोधीमानो दातुर्यता।**
**अपरमाता स्वगृहेचैव विरोधोअपरमातुनः॥ ४॥**
**नित्यक्लेशोपि जायते नित्योदृष्टबुद्धिश्चपुत्राणाम्।**
**रोहण्यां जायते जन्म दुष्टबुद्धि च विक्रमम्॥ ५॥**
**सद्यजन्मः हि रोदंते अधोघटीका च मृत्युदा।**
**तस्यमाता हरेत् हस्ते विक्रमं कृतेध्रुवम्॥ ६॥**
**चतुर्विंशति वर्षेण पितादुःखं तथैव च।**
**आत्मपत्नी सदाचारी सुशीला सकोमला॥ ७॥**
**पूर्वे संतानो नास्ति इहजन्मे पुत्रहीनता।**
**द्वारकायां तीर्थानी जायते सपत्निकम्॥ ८॥**
**तीर्थे तु गतालोका द्वारकादेशे समागतः।**
**मार्गाणां च गतो सर्वे पुरउत्तममार्गता॥ ९॥**

जनाः सर्वेभोज्यंते रहित्वाच स्नानमेव च।
पाकस्त्रि तु कृतोस्त्रीयां ओदनेन च उत्तमम्॥ १० ॥
महातप्त उदकोयेन धृतायां भूमीमध्यकम्।
भूमिमध्ये यो जीवानी सप्तजंतु च दग्धकम् ॥११ ॥
सद्यः प्राणगतायेन मातु शोकं करिष्यति।
पुरूर्षे उदकानीधृतायेन पुर्वपापेन लिप्यते ॥ १२ ॥
एवं मार्गेण कृतंपापं दग्धा पिवांनि सप्तकम्।
द्वारावत्यं गतायेन ब्राह्माणानां गृहमाश्रयम्॥ १३ ॥
मासमेकं तिस्ठतो ग्रामं द्वारकायां पुरमुत्तमम्।
गोमतिस्नानंकृतं येन द्वारकानाथेन मुत्तमम्॥ १४ ॥
एकोपि दिवसे गोमती स्नानं करिष्यती।
विप्रपत्नी तद्दीवसे च स्नानंकृत्वा गमीष्यति॥ १५ ॥
मज्जनो क्रियतेस्त्रीयो श्रृंगारो हेमभूषणम्।
वस्त्रमध्ये धृतायेन गृहीता सपत्नीकम् ॥१६ ॥
पूर्वेश्रृंगारगृहे येन इहजन्मे दुःखदायकम्।
कर्मे सर्वपुरूषेणनीराशो इहजन्मयः।।१७ ॥
निशायां गतोयेन नाशयेत् सपत्निकम् ।
महानिशा मार्गेण ग्रहं सर्वेणतस्करम् ॥१८ ॥
निराशो सपत्नी च हरं सर्वेण वस्तुनि।
महत् शोकं कारयेत् उभयोः किं करिष्यतः ॥१९ ॥
पूर्वजन्मेस्त्रि पुरूषाणां इहजन्मे सपत्निकम्।
महापापै उभयोकृत्वा पूर्वक्रमेण संचकौ॥ २० ॥
तेन पापेन लिप्यन्ते इहजन्मे च दुखदीयताम्।
पंचहेमानि दातव्यं शास्त्रेण कृतं ध्रुवम्॥२१ ॥
द्वौ धेनू सवत्साणां पात्राणां च समर्पणम्।
हेमपत्नीकृतं येन पंच वस्त्रं सर्मपणम्।। २२ ॥
अश्र्वनि गर्भसंयुक्त कर्णेन च दापयेत्।
ब्रह्मपुरी यथाशत्या ब्रह्मभोजन कारयेत्॥ २३ ॥
रक्त वस्त्रो दातव्यं द्रोणानि च पंचकः।

सुखसय्या यथाशत्या देयं भोजनमुत्तमम्॥ २४॥
भौमव्रतंकृतं येन मासैत्रयोदशस्तथा।
रक्तवस्त्रं रक्तधान्यं च ताम्रकलशेन स्थापयेत्॥ २५॥
मध्यान्ह्ये च सूर्येण कर्तव्यं पूजनं सदा।
भक्तिपूर्वेण पूजायां फलं प्राप्नोति वांच्छितम्॥ २६॥
त्रिपुष्पाणि भौमस्य त्रिपुष्पम् भूमिलेपनम्।
करेण पुष्पैरक्तै च कमलै रक्त चन्दनैः॥ २७॥
धूपैघृतदीपै च नैवेद्यंमोदकं तथा।
रक्त सूत्रै वेष्टितो कलशः यथावित्तेन पूजयेत्॥ २८॥
एवंकृतेन व्रतोयं फलं प्राप्नोति सद्यः।
स्वभत्यास्वचारेण विश्वासोक्रियते ध्रुवम्॥२९॥
फल कौशमांडपंचैक नित्यंफलानि विशेषदम्।
एवं पुण्य कृतेनैव पुत्रप्राप्ति द्वयं तथा॥ ३०॥
पुत्रिमेकं सुखंऐन पुत्रो प्राप्ति वश्रीयः।।

श्री सूर्योवाच

कुंकणदेशे नवसारीपूरे रजकज्ञातौ पूर्वजन्मः ज्ञेयः। तस्यगृहे अश्विनी नक्षत्रे शुशील-क्रियाकुशल- गौरवर्णीयः तथा बुद्धिमान पुत्रःजात। तथा हस्तनक्षत्रेन जातः पुत्रः बुद्धिमान तथा दाताज्ञेया। तस्यगृहे अपरमातात्वात् उभयो विरोधेन नित्यक्लेशःज्ञेय। तदनन्तरं रोहिणी नक्षत्रे दुष्टबुद्धित्वात् परस्पर विषदानेन भ्रातुद्वयस्य नाशः ज्ञेय। प्रथम यः आसीत् तस्यकृते चतुर्विंशाति वषै एवं पितामृत्युदुःख जातम्। तस्यपत्नि सदाचारी शुशिला सकोमलाच ज्ञेपा। किन्तु पूर्वजन्म इव इहजन्मनि अपि सन्तान सुखं नास्ति। यतः सपत्निकं द्वारका तीर्थंगतः।

द्वारकायं गत्वा ब्राह्मणस्य गृहे एकमासपर्यन्तं निवासं कृत्वा गोमतीस्नानं तथा द्वारकानाथस्य दर्शनं कृतम्। एकस्मिन दिवसे यदाविप्रपत्नी स्नानार्थ गत्वा मज्जनं कृतवति तदा वणिक तस्याः हेमभूषणं श्रृगारादिकं

हरित्वा स्वपत्नया सह पलायनं कृतम्। पलायन समये रात्रीकाले तस्कराः आगत्य तेभ्यः दम्पतिभ्यः सर्वम् हेमभूषणादिकं हरितवन्तः । अतः निराशभूतः दम्पति किं करिष्यति। पूर्वजन्मस्य पूण्यात् इह जन्मे सप्तनीकभूत्वाऽपि पूर्वजन्मस्य महापापात् सन्तान सुखं नास्ति।

अतः पाप विमोचनार्थं पञ्चहेमानी – द्वौ संवत्साधेनौ तथा पात्राणां च दानं करणीयम्। हैमीपत्नीप्रतिमांकृत्वा तेन सह पञ्चवस्त्र सर्मपणं करणीयम्। गर्भसंयुक्ता अश्विनी दानं करणीयम्। यथाशक्ति ब्राह्मण भोजनं, रक्तवस्त्र –पञ्चद्रोण परिमित धान्यं – सुखशय्या इत्यादि स्व शक्त्या ब्राह्मणाय देयम्। पश्चात् त्रयोदशमास पर्यन्तं भौमव्रतं कृत्वा रक्तवस्त्रं – रक्तधान्यं तदुपरी ताम्रकलशं संस्थाप्य मध्यान्ह समये सूर्यपूजां भक्ति पूर्वेण कृते सति वांच्छितं फलं प्राप्नोति। तथा भौमस्य पूजनं करणेन रक्तपुष्पैः रक्तकमलैः, रक्तचन्दनेन च पूजनं कृत्वा, धूप –धृतदीपान्ते मोदक नैवद्यं अर्पयित्वा रक्तसूत्रेण वेष्टितकलश यथा वित्तेन पूजयित्वा दातव्यम्। एवं स्वभक्तया एव आचरेण विश्वासपूर्वक कृतेन व्रतेन वांच्छितं फलं प्राप्नोति। तदनतरं पञ्चकौशमाण्ड दानं एवं नित्यफल दाने करणेसति पुत्रद्वयम तथा एकाकन्याः प्राप्ति र्भवति।

**श्री कर्मविपाके सूर्यार्णव संवादे फलं सिंह लग्नेन कथ्यते।**

**।। अथकन्यालग्नफलम्।।**

**॥ अरूणोवाच ॥**

**सूर्यस्वामिमहाबुद्धे कृपायां च कुरू मम।**
**संसारो हितकाथैन फलं ददाति सद्यकम् ॥ १ ॥**

हे सूर्य। हे स्वामी। हे महाबुद्धे। ममोपरिकृपां कुरू तथा संसार हितार्थाय कन्या लग्न फलं कथय।

**श्री सूर्योवाच**

कन्यालग्नप्रवक्षामि श्रोतव्य अरूणस्सदा।
पूर्वजन्मकास्मीरश्च्च ब्रह्मक्षत्री च जायते ॥ २ ॥
म्लेच्छशास्त्रविशेषेण प्रतापोग्रामदेशकः।
अश्र्वरथेन सुखासने चैव भाग्ययुक्तो सदैवतम्॥ ३ ॥
उत्तराषाढेनजन्म गौरवर्णेसदासुखी।
तृतीयः स्त्री गृहे यस्य संतानो नैवदर्शयेत्॥ ४ ॥
पूर्वे वंशदोषस्य इहजन्मे पुत्रहीनता।
समीपे गृह विप्रस्य भाग्यशालि सदैवतम्॥ ५ ॥
पूर्व जन्मे ब्रह्महत्या च पूर्वजन्मेविशोधयेत्।
बालकोपूर्व पंचवर्षाणि मातुतातेन नाशयेत्॥ ६ ॥
पूर्वेण वंशदोषे च इहजन्मे दुःखदायकम् ।
पुरमध्ये विप्राणां धनसंचेन पूर्णताः ॥ ७ ॥
विप्राणं वंशकोजाता क्षत्रिविप्रेण आत्मिकः।
विप्राणां धनं सर्व गृहीत्वा क्षत्रियस्तथा॥ ८ ॥
क्रोधेन विप्रात्मघाति च सद्यप्राणगतैरपि।
विप्र गृहे भार्या च साधवि सधर्मचारणि॥ ९ ॥
अग्निभक्षे कृते येन स्वामिणं च संनिधौ।
तस्यश्रापो पूर्वजन्मे ब्रह्महत्याच पूर्वजन्म विप्रघातकः ॥ ११ ॥
विप्रपत्नि पूर्वे च अग्नीभक्षं करिष्यति।
द्वौजन्मानि पापस्य इहजन्मे च निराश्रयम्॥ १२ ॥
वहु दिवसानिधनं विप्रभक्षंते क्षत्रियमेवच।
द्वयंस्त्रि मृताक्षत्रि एकापत्नि स्थिरा भवेत्॥ १३ ॥
क्षत्रीयोगृहे विनष्यति धनधान्य अश्र्वकः।
सुखसंपदा गृहे वस्त्रं भूषणं सर्वेविसर्जनम्॥ १४ ॥
गृहे अन्ननास्ति च स्व गृहं क्रयविक्रितम्।
अन्नवस्त्राणि हरेत विप्रो परक्रर्मेण संचकम् ॥ १५ ॥
पुरामध्येगतो क्षत्रियत्रिएकं च सद्ययम्।
कुरूक्षेत्रस्य गता उभयो स्नानेन देहमुत्तमम्॥ १६ ॥
द्वादश वर्षाणि कुरूक्षेत्रस्य स्नानदांनानि कृतंद्वयम्।

प्रथमं स्वामिणो हंता पश्चात् पत्नि च निश्चयम्॥ १७॥
कुरूक्षेत्रे गताप्राणा इहजन्मे ज्ञातिउत्तमम्।
सप्तहेमानी दातव्यं सप्तद्रोणमुत्तमम्॥ १८॥
अष्टमम् दानंयथाशक्तं सवत्यं धेनुमेकिकम्।
मुक्ताफलं प्रवालं च पञ्चरत्नानिदापेयत्॥१९॥
द्वितीय द्रोण घृतपात्रं च सुख सय्या यथाविधि।
उमामहेश्वर द्वयं च दातव्यं नित्यफलानि समर्पणम्॥ २०॥
सूर्यव्रतं षट्मासानि शास्त्रोक्त विधिपूर्वकम् ।
श्वेतवस्त्रा स्थाप्यंते पद्मंकुर्यात् तांडुलैः॥ २१॥
रूप्यकलशानि यथाशत्या रविमुहूर्तेन समर्पणम्।
रविवारे उत्तममासे सलग्ने शुभयोगजम्॥ २२॥
मध्यान्नेकृतं पूजा कुसुमै मदनसमर्पणम्।
शर्कराओदनं भक्षं च फलं प्राप्नोतिवांच्छितम्॥ २३॥
ब्राह्मणानां उदकं देयं संवत्सरमेककम् ।
कौशमांड सप्रैव दातव्यं यथाशक्तिकम्॥ २४॥
पुत्रपुत्री द्वयं चैव दांनेनविधिपूर्वकम् ।
ब्रह्मभोज्यं यथाशक्ति संपन्नो जन्मजन्मतः।। २५॥
शरीरे वस्त्रत्रयंचैव कुर्यात् स्नानं विधिपूर्वकम्।
धर्मेणवर्द्धते वंशो यथाशक्ति च कारयेत्॥ २६॥

हे अरूण। कन्यालग्नं प्रवक्षामी तत्त्वया श्रुतव्यम्। पूर्वजन्मे ब्रह्मक्षत्रीयज्ञातौ कास्मिरे प्रतापग्रामे म्लेच्छशास्त्र विशेषेण भाग्ययुक्तः अश्वरथः संयुक्तः सुखासने जन्मजातः। उत्तराषाढानक्षत्रे जन्मश्चेत् गौरवर्णीय सदासुखी, त्रयस्त्री युतः किन्तु सन्तान रहितः ज्ञेय। पूर्वकृत वंशदोषेन इहजन्मे पुत्रहीनता ज्ञेया। भाग्यवशात् पूर्वजन्मे स्वगृहसमीपे विप्रस्य गृहं ज्ञेयम्। तस्य विप्रस्य बालकः तथा पत्नीसहित हत्या करणेन ब्रह्महत्याः तथा वंशदोष ज्ञेय। तेन कारणेन इहजन्मनी दुःखी ज्ञेय। पुरमध्ये निवसितविप्राणां धनसंचयं कृत्वा क्षत्रीय ज्ञातौ वर्ण परिवर्तन कृत सति, विप्रः क्रोधेन अत्महत्यां कृतवान्। तथा सहधर्मचारिणीभार्याऽपि

स्वामीनासन्निधौ अग्नीभक्षं कृतवति। तेन विप्रधातकृत्वात ब्रह्महत्या कृतत्वात् विप्रप्रत्नीनाशत्वाच्च जन्मद्वयंपर्यन्तं निराश्रयं भवति। पूर्वजन्मे ब्राह्मणमरणान्तां ब्रह्मक्षत्रियः विप्रधनं भक्षयत् आशन् तथा तस्य द्वौ पत्न्यौ मृते। तथा एक एव जीविता। तस्य गृहे धनधान्य अश्वादि सुखसम्पदा वस्त्र भूषणादिनां क्रमेण विसर्जनं जातम्। यदातस्यगृहे अन्नभक्षयमापि जातं तदा स्वगृहै विक्रीय देशान्तरे कुरूक्षेत्रं आगतः। तत्र सपत्नीकेन ब्रह्मक्षत्रियेण द्वादशवर्ष पर्यन्तं स्नानादानादिकं कृतम्। तदनन्तरम् तस्य मृत्युजातः पश्चात तस्य पत्नी अपि मृता। अतः कुरूक्षेत्रेगत प्राणात्वात् इह जन्मे उत्तम ज्ञाति वर्तते। पूर्वजन्मकृतपाप निवारणाय अस्मिन जन्मे तेन सप्तहेमानि, सप्तदोणपरिमित धान्यं अष्टशल्यदानं सवत्सा धेनुदानं मुक्ताफल-प्रवाल-पञ्चरत्नदानं द्रोणद्वयपरिमित धृतदानं कृत्वा उमामहेश्वर पूजनं करणीयम्। नित्यफलदानं करणीयम् पश्चात शास्त्रोक्त विधिपूर्वकं षड्मास पर्यन्तं सूर्यव्रंत करणीयम् तद्यथा स्वेतवस्त्रोपरि तण्डुलैः पद्मंकृत्वा रौप्यकलशं संस्थाप्य रविवारे उत्तममासे योगे लग्ने च मध्यान्हे सूर्यआवहनंकृत्वा मदनकुसुमैः पूजां कृत्वा सर्करा ओदनस्य नैवद्यं अर्पणेसति वाञ्छितं फलं प्राप्नोति। ब्राह्मणेभ्यः उदकदानं कृत्वा एकस्मिन वर्षे सप्त कौशमाण्दानं यथाशक्ति ब्राह्मणभोजनं करणेसति पुत्रपुत्रीद्वयं सम्मानः भूत्वा जन्मजन्मातरोऽपि शुद्धतां प्राप्नोति।

**इतिश्री कन्यालग्नं समाप्तस्य तुलालग्नं प्रवर्तते।**

**।। अथ तुलालग्नफलम्।।**

**॥ अरूणोवाच॥**

**सूर्यस्वामी महातेजो सर्वाव्याप्तिदिवाकरः।**
**जनानां च हितार्थाय पूर्व संचित कर्मकम् ॥ १ ॥**

हे सूर्य स्वामी। हे महातेज। हे सर्वव्याप्तदिवाकर। जनानां हिताय तुलालग्नस्य पूर्व संचित कर्मं कथय।

**श्री सूर्योवाच**

**पूर्वं गुर्जरदेशानां महीतटानि उत्तमम्।**
**महासागर समीपस्य स्तंभपुरेण उत्तमम्॥ २ ॥**

वणिको ज्ञातिपूर्वे च एकाकि ग्रहेण च।
मातु तात जन्मतो नाशं एकाकि गृहमेव च॥ ३॥
पूर्वजन्मे श्रावकोधर्म क्रियाभ्रष्टेन संस्थितः।
तैलधान्य क्रयविक्रयस्य व्यापारो बहुलंकृता॥ ४॥
कोटिजीवानि प्रायश्चितं स्वयं न शुद्धता।
स्नानदानानि नजानाति शरीरो मलिनस्तथा।। ५॥
हस्तेन जायते जन्म मलीनोजन्मतस्तथा।
स्वगोत्रस्य वहुत्राणि विरोधाः कुटंबके तथा॥ ६॥
कुटुंबद्रोही सदावणिको ज्ञानहीनेन सर्वदा।
भ्रातृ हीनो महादुष्टो व्यापारो मलिनः सदा॥ ७॥
मुखस्वादि क्रयं यस्य स्वयं इच्छा च कारयेत्।
स्वजना सर्ववैराश्च दुष्टकर्म समाचरेत्॥ ८॥
स्वयंगोत्रेकृतं कर्म ज्ञाति मध्ये च विक्रयम्।
कुटंबोविधवायेन कर्मकर्ताच निश्चियम्॥ ९॥
म्लेच्छै सर्वगृहंयेन वणिको बंधनेन च।
पंचगर्भोनिपातं च इहजन्मे दुःखदायकम्।। १०।।
षट्मासे बंधनोमुक्तं गोदावरी देशमागता।
उभयोयेन गतं देशो उत्तमतीर्थे समागमम्॥ ११॥
गंगा त्र्यम्बके ग्रामस्य पुरत्र्यम्बकमुत्तमम्।
द्वादशवर्षाणि स्थिरोयेन स्नानंकृत्वा सपत्निकम्॥ १२॥
दौपुत्र उदयो येन गौरववर्ण अतिचंचलाः।
सप्तवर्षाणी द्वयंपुत्रा सद्यप्राणगतैरपिः॥ १३॥
उभयोबहु एकस्य कृतेन दिनरात्रकम्।
पूर्वोपि यो समोहं च इहजन्मे दुःखदायक॥१४॥
एकोपि दिवसे स्वगृहेण पाकं कृत्वा सपित्नकम्।
निशायां च गृहं दग्धं को अनिवार्य दुःखदा॥१५॥
गृहसमीपे पुष्पकरास्य चक्षुहीनेन पुत्रकम्।
सप्तादशवर्षाणां दुःखेन प्राणनाशयेत्॥१६॥
अश्वनि गर्भसंयुक्त एकोपिवृषभःस्तथा।

सगर्भा धेनुमेकं जंतुनां कोटी मेव च ॥१७॥
ग्रामदग्धं पूर्वोक्त महत्पापैकृतंनरः।
कोटिजीवो गतै प्राणै पंचजन्मो पुत्रहीनता ॥१८॥
गोत्रगमन महापापै दुष्टकर्माणिआचरेत्।
अंधेन मृतोवाणिकः पश्र्चात् स्त्रीया हि जायते ॥१९॥
एं पूर्वकर्मणः पंचजन्मेन दुखदा।
हेमानि द्रव्यं दातव्यं यथावित्तेन दापयेत्त ॥२०॥
हेमाप्रतिमा कर्तब्यं च धेनुमेकां सवत्सकम्।
एकास्त्री हेमस्य पुत्रोयं हेमयस्तथा॥ २१॥
एकोवृषभ दातव्यं निलोत्सर्गेन कारयेत्।
महादोषे निर्वतव्यं इहजन्मे सफलं भवेत्॥ २२॥
यपत्निका संतोषस्य षट्मासानिकारयेत्।
सगर्भास्त्रीपूज्यंते विश्वासेन फलं भवेत्॥ २३॥
तस्यउच्छीष्ट् भक्षंस्यात् फलंप्राप्तनोति सिद्धये।
एवं कृतेन पुण्येन महापापै प्रमुच्यते॥ २४॥
यथावित्तो यथादेयं ग्रहवित्तानुसारिणम्।
नर्मदां उभयोगत्वा सवस्त्रंस्नानमाचरेत्॥ २५॥
दौपुत्राणि उदयं स्यात् एकपुत्रः सुखी भवेत्।
पूर्व प्रायश्चित्य विमुत्यर्थं इहजन्मे सुखदायकम्॥ २६॥

पूर्वे गुर्जरदेशे महीसागरस्य उत्तम तट समीपस्थ स्तंभपूरे उत्तम वणिक ज्ञात्यां जन्मः जातः। जन्मानन्तरं एवं माता पितरोः नाशत्वात् एकांकी एव जतः। पूर्वजन्मे तैलधान्यादि क्रयविक्रयस्य व्यापारकर्ता क्रियाभ्रष्ट वणिकःआसीत्। कोटी जीवानां प्रायाश्चितयुतः शुद्धतारहित स्नानदानादिनां अकर्ता तथा मलीनशरीरी आसीत्। हस्तजन्मे जातस्य अस्यबणिकः स्वगोत्रे कुटुम्बद्रोही महादुष्ट मलीन व्यापार रतः भ्राताहीनः स्वजेनभ्य वैरीभावयुतः तथा दुष्टकर्मीआसीत्। तेन स्वगोत्रे तथा ज्ञातिमध्ये कृत विक्रय कर्मेण स्वकुटुम्बम् विधवादृशः कृतः। तस्यसर्वधनं म्लेच्छगृहितं तथा वणिको बन्दीः जातः। स्वस्त्रीयः पञ्चगर्भानां निपातं अपि तेन

कारीत:, अत: इह जन्मे तत्पाप दु:खदायक:।

षड्मासानन्तरं वन्धनमुक्तोजात: तदनन्नतरं स्वभार्यासह देशान्तरं कृत्वा गोदावरी समीपस्थ त्र्यम्बकपुरे आगत: तत्र द्वादशवर्ष पर्यन्तं पत्न्यासह नद्यां स्नानं कृतम्। तेन गौरवर्णियौ अति चञ्चलौ द्वौ पुत्रौ जाताम्। पुत्रयो: सप्तवर्षावस्थायां एव नाश: जात:। पूर्वजन्मस्य मोहेन इह जन्मे अहोरात्रस्य परिश्रमेणाऽपि दु:खी आस्तांम्। एकस्मिन् दिने सपत्नीक वणिक पाचयन् आशान् तदा तस्यगृहं दग्धम्। तस्य गृह समीपे चतुहीन: पुष्पकारस्य पुत्र: आसीत् स: अपि सप्तदशवर्षावस्थायां एव मृत तथा गर्भवति अश्वनि एक: वृषभ: सगर्भा धेनु, कोटि जन्तव: तथा सम्पूर्ण ग्रामम् तद् अग्नौदग्ध:। अत: कोटी जीवानां प्राणनाशत्वात् पञ्चजन्म पर्यन्तं पुत्रहीनता। गोत्रगमनस्य महापापात् अन्धजात: स: वणिक: मृत:। पश्चात तस्यस्त्री अपि मृता एवं पूर्वकृतपापेन पञ्चजन्मपर्यन्त् दु:खी भविष्यति।

तत्दोष परिहारर्थ यथाशक्ति हेमद्वयं वित्तं च दातव्यम्। सवच्छक धेनो: तथा पुत्रसहितस्त्रीय: हेमीयप्रतिमां कृत्वा दातव्यम्। तथा एकनील वृषोत्सर्गेन महादोषात् निवर्तनं भवति। तेन जन्मोयं सफलो भवेत्। षड्मासपर्यन्तम् पिपलिकाभ्य: भोजनेन सन्तुष्टयेत् तथा सगर्भास्त्रीयपूजनं कृत्वा तेषां उच्छिष्ट भोजनं भुङक्तेसती महापापै: प्रमुच्यते। तदनन्तरं नर्मदां प्रतिगत्वादम्पति: सवस्त्रं स्नानमाचरेत् तेन पुत्रद्वयस्यप्राप्ति भविष्यति तथा निश्चयेन एकपुत्रस्य तु सुखं प्राप्तत्वेव एवं पूर्वपापास्य निवृत्ति: इह जन्मे सुखदायका।

**इति श्री कर्मविपाके सूर्यअरूणसंवादे तुला लग्नं समाप्तं**

## ।। अथवृश्चिकलग्नफलम्।।

**।। श्री अरूणोवाच।।**

**सूर्यस्वामी महावुद्धे त्रैलोक्यसचराचराम्।**
**जनानां च हितार्थेन पूर्वकर्माणि कथ्यते।। १।।**

हे सूर्य। हे स्वामी। हे महाबुद्धे। हे त्रैलोक्यस्यचराचर जनानां हितार्थं पूर्वकर्माणी कथय।

**।। श्री सूर्योवाच।।**

वृश्चिकलग्नं प्रवक्षामि श्रोतव्यं अरूणस्तथा।
अवंतिकायां पूर्वजन्म समिपं पुरमुत्तमम्।। २।।
पूर्वेवाणिकोजाति भाग्यशालि सुखीभवेत्।। २।।
व्यापारो सर्वधान्यानि ग्रहाणां सुख संपदम्।
अभिधानक्राच त्रिकाण रोगोनास्ति शरीरता।। ३।।
तस्य उदरे द्वौपुत्रस्य पुत्रीणां त्रयस्तदा।
गृहे पंचागलक्ष्मी च भार्याचैव सुकोमला।। ४।।
कनिष्ठपुत्रोमहाशूरो खड्गपंचानिधारयेत्।
द्वेस्त्री गृहे चैव गौरवर्णा च उत्तमा।। ५।।
कनिष्टस्त्री आत्मिकाआगाररानी च षोड्श।
संतोष स्वामिणं चैव वस्तु समर्पणम्।। ६।।
उभयोस्त्री संतानं नास्ति त्रयजन्मनिकष्टकम्।
जेष्ठस्त्री अरूचिस्तस्य स्वयं मानहीनता।। ७।।
स्त्रीहत्या पूर्वजन्मस्य युगेन च वर्त्तते।
वषै षोड्शवर्षेणइतोऽपि तस्यां च मरणकम्।। ८।।
द्वौभ्राता पृथकं चैव जेष्टपुत्रे हि सोऽपिदारा।
कोपि विशंति वर्षेण मातुनाशं तथैव च।। ९।।
श्रवणेन जन्मतो माता स्वधर्मा च पतिव्रता।
मातृ पितृ नाशयेत्तपुत्रो व्यापारो सर्वनिन्दकम्।। १०।।
कनिष्टभ्रातापत्यस्य स्वयं स्त्रियेन हन्यते।
तेनपापेन सर्वनाशे च स्त्रिणां प्राक्कर्मकुर्वतः।।११।।
म्लेच्छे सर्वगृहं सर्वं ज्ञातिमध्ये विसर्जनम्।
निशायां नाशये उभयोकोऽपि देशांतरेपि च।। १२।।
मांधाता ओंमकारे च नर्मदातीरेन आश्रयम्।
नर्मदायां कृतंस्नानं सपत्नि सुखदायकम्।। १३।।
सप्तवर्षाणि नर्मदातिरे स्नानंकृत्वामनसा सपत्नीकम्।
भाग्ययुक्तो तस्यैमेकं लक्ष्मियुक्तो सदावृतः।। १४।।
धनसंपन्नपश्ये च दातारो सुखदायकम्।
साधुपूरूषो महत्वृद्धो धर्मयुक्तो सदैवत्।।१५।।

वणिकस्य महापूरूषहरामते पुरूषस्तथा।
अतिथ्येन धनं सर्व गृहीतो वणिकस्तथा।।१६।।
अतिथेन शिशोमेकं गृहीत्वा वणिकस्त्रियः।
गुरूणांधनं गृहं योन वाणिकेन बंधनंकृतम्।।१७।।
षट्मास बंधनं येन वणीकोसप्तनीकः।
कोदिवसे बंधनोमुक्त्वा बंधतेन मृतांस्त्रियम्।। १८।।
एकोजात्या वणिकस्य एकोजाति च दुःखदा।।
वैराग्यो स्वयंयेन भस्मलेपेन कारयेत्।।१९।।
सकलदेशोतीर्थानि कृतेन वणीकस्तथा।
पूर्वपापो कृतंयेन इहजन्मेन दुःखदा।। २०।।
स्त्रीहत्या प्रथमोयेन पश्चात् योगीणां च यत्।
तेनपापेन लिप्यंते इहजन्मे च कष्टदा।। २१।।
चतुर्थ हेम दातव्यं शास्त्रोतेन च दापयेत्।
पूर्वकर्मबहुत्राणि धर्मेण फलमुत्तमम्।। २२।।
ताम्रकलशोमेकं च तत्पात्रै वा घृतस्तथा।
पूरयेत् च यथा शत्यादानेन सफलं भवेत्।। २३।।
धेनुमेकंसवत्सस्य महिषं अनुवत्सकम्।
तेनुपुण्येनकृतं येन पूर्वकर्मणि मुत्तमम्।। २४।।
उमामेकं सुखसय्या यथा शक्त्येनदापेयत्।
शनौव्रतानि षट्मासानि कर्तव्यं सुखवासिना।। २५।।
गंगातीरे गतायेन मरणंप्राप्नोतिपूर्वकम्।
पूर्वजन्मे ज्येष्ठ पत्नी च इहजन्मेसपत्निकम्।। २६।।
यथाशत्यं ब्रह्मभोज्यं च कुमारिकायां सप्तभोजनम्।
ब्राह्माणानां उदकंदद्यात् सद्पात्रेण समर्पयेत्।। २७।।
एकःपुत्र समुत्पन्नो वंशो वर्द्धयति निश्चयः।
स्वशरीरेसुवस्त्राणि सद्भक्ति सुपत्नी च।। २८।।
नित्यफलानि दातव्यं प्रयत्नेन च तत्फलम्।
पुत्रोदयं गौरवर्णं च पुनर्जयति वर्द्धनम्।। २९।।
एवंकृत्वा च पुण्यानि सद्पात्रे च विशेशतः।

**तेनपुण्येन लभतेवांच्छितं फलमुत्तमम्।। ३०।।**

**।। श्री सूर्योवाच।।**

**एवं कथयति श्री सूर्यश्रोतव्यं अरूणः सदा।।**

श्री सूर्यउवाच

हे अरूण वृश्चिकलग्नफलम् प्रवक्षामी तत् त्वया श्रुतव्यम्। पूर्वे अवन्तिकासमीपे उत्तमपूरे वणिक ज्ञातौ भाग्यशालीत्वेन जन्मजातः। सर्वधान्यानां व्यापारकर्ता गृहे सुखसम्पदयुतः तथासुआरोग्यवान् आसीत्। तस्य सुकोमलायाः भार्या उदारत् द्वौ पुत्रौ तथा पुत्रीत्रय प्रसूतः। तस्यगृहे पञ्चाङ्ग लक्ष्मी आसीत्। तस्य कनिष्ठपुत्रः महाशूरः एवं कनिष्ठ स्त्री षोडशश्रृंगारयुता- सन्तोषी एवं स्वामिनं प्रति वस्तुसमर्पणं आसीत्। उभयोः जन्मत्रयपर्यन्तं स्त्रीसन्तानं नासीत्। अरूचाजेष्ठीस्त्री स्वामानहीना आसीत्। पूर्वजन्मे षोडशवर्षावस्थायां विषं पित्वा आत्महत्यां कृतवति।

तया कनिष्ठभ्राता अपत्यस्य हननं कृतम् तेनपापेन सर्वनाशः जातः। सर्वनाश अर्थात तस्य सर्वं गृहादिकं धनम् म्लेच्छगृहितं ज्ञाति मध्ये विसर्जनं जातम्। अतः दम्पतिना निशायां देशान्तरं कृतम् नर्मदातीरे मान्धाता ऊंकारेश्वर तीर्थे आश्रयंनीतः सप्तवर्षपर्यन्तं नर्मदायां सप्तनीकं स्नानं कृतम्। अतः सः वणिक लक्ष्मीवान् भाग्यवान् सदाव्रति धनसंम्पन्नः- दातार तथा सुखीजातः। तस्य प्रतिष्ठा साधुपुरूष महत्वृद्धः- धर्मी -सदाब्रतित्वेनजातः। किन्तु सः अतिथीनां धनहर्ता आसीत्। एकदा तेन स्वस्त्रीणासह मिलित्वा अतिथेः शिशोः हरणंकृतम् तेन सःसपत्नीक वन्दीजातः।

वन्धन अवस्थायां एव तस्य स्त्री मृता। अतः एकांकीजात वणिकोयं वैराग्येन भस्मलेपनं कृत सर्वदेशानां तीर्थाटनः कृतः जातः। पूर्वजन्मस्य पापेन इह जन्मनी अपि दुःखी अस्ति। पूर्वजन्मकृत स्त्री हत्या एवं योगिनां हत्या पापेन लिप्तोयं इह जन्मेऽपि कष्टभागि।

तस्यपापस्य निवारणार्थं शास्त्रोक्त हेम चतुष्टय दानं करणीयम्। एकःताम्रकलश पलैर्वा घृतेन पूरयित्वा फलेन सह दातव्यम्। सवत्सक धेनु एवं महिषि दानं पूर्व पापक्षयार्थं करणीयम्। एकासुखशय्या यथा शक्त्या कन्यायै दातव्या। षड्मासपर्यन्तं शनिव्रंत कर्तव्यम् पश्चात् गंगातीरेगत्वा मरणं प्राप्तव्यम्। तेन पूर्वजन्मे

या पत्नी सा अग्रीमजन्मे पत्नीत्वेन प्राप्स्यते। यथाशक्ति ब्राह्मण भोजनं सप्तकुमारिका भोजनं - ब्राह्मणेभ्य
उदकपूर्ण पात्रदानम् करणीयम्। एकपुत्रेण निश्चित् रूपेण वंश वर्द्धयति। तथा एवं कृते पुण्येन सत्पुत्र सुवस्त्र सदभक्ति एवं सुपत्नी प्रप्तिभवति। नित्यफलदानेन गौरवर्णीय पुत्रोदयं भवति। अत: एवं पुण्यानि करणे सति सत्पात्र विशेरूपेण वांच्छितं उत्तमं फलं प्राप्नोति।

।। श्री सूर्योवाच।।

एवं श्री सूर्य कथयति तथ अरूण: श्रृणोति।

**इति श्री कर्मविपाके सूर्यार्णव संवादे संचित कर्मकथनं नामवृश्चक लग्नं समाप्तं**

**।। अथ धनलग्नफलम्।।**

**।। अरूणोवाच।।**

**कश्यप सुत महाबुद्धे तेजोमय दिवाकर।**
**पूर्वकर्म संचितंयेन कथयत्व महामते।। १ ।।**

**।। श्री सूर्योवाच।।**

**धनलग्नं प्रवक्ष्यामि श्रोतव्यं अरूणस्सदा।**
**नामिश्रडोधर्मपुरी ग्रामे नर्मदातीरमुत्तमम्।। २।।**
**ऋषि बलोमहाज्ञानि स्वगृहे सुखिएव च।**
**जन्मतो रोहिण्यश्चैव दातापूर्ण विशेषद:।। ३।।**
**एकोचक्षु: ऋषेतस्यवामंगेऽपिलांच्छनम्।**
**हरिभक्तो सदाचारि ललाटे गोपिचन्दनम्।। ४।।**
**बलराजो इतिवैरागी प्रसिद्धो वैष्णवस्तथा ।।**
**कर्ण हस्त तुलसीधरो गोविन्देति जयं कुरू।। ५।।**

मठमंदिरह्यधामं चित्रशाला विशेषद्।
गृहे चतुर्भुज स्वामी सेवात्रय मंदिरम्।।६।।
पुरमध्ये जनैः सर्वे दर्शने तस्य आगता।
नित्योऽपि दर्शनं कृत्वा पुरूषाणां स्त्री विशेषदा।।७।।
ब्रह्मपुत्री विधवामेका षोडशवर्षेणउत्तमा ।
द्वादशवर्षेण स्वामिकष्टो पूर्वजन्मेन स्तंचकार।।८।।
वैराग्येण कृतं माया विशेषा आत्मिक सदा।
ब्रह्मीगमनकृता येन सुखनास्ति च जन्मके ।।९।।
पंञ्चगर्भाविनश्यन्ति वालहत्यास्तथैव च।
विधवायां जनाकोयेन वैदमेवग्रहमागता।।१०।।
महाक्रोधेन विप्रेण दुःखं त्यजति प्राणकम्।
उदरे खड्ग प्रहारं च श्रोणिधारो विशेषतः।।११।।
सद्यः प्राणगता विप्रो ब्रह्महत्या करिष्याति।
निशायां वैष्णवोएन ब्रह्मपुत्री द्वयं तथा।
उभयो देशान्तरेगत्वा मणबाणेनमाश्रयंम्।।१२।।
धन बहुलं ब्रह्मपुत्रं पितायां गृहीतो यथा।
वैष्णवो ब्रह्मस्त्रीणं भक्षति सदा भवेत्।।१३।।
पूर्वमध्ये धर्मशाला च कर्तव्यं स्नानमेव च।
कोदिवसो रोहितो येन वैष्णवो ब्रह्मपुत्रिकम्।।१४।।
सप्तदशानि पुरस्थानकं द्वौ पुत्रौ प्रसवोतनं। (सुशिलोपुत्रउत्तमम्)
वैष्णवो जलघातिनं मरणंप्राप्तिसध्ययम्।।१५।।
पश्चात्पंचवर्षाणि देहंत्यजतिपत्नीकम्।
द्वौ पुत्रौ दुःखंबहुलं मातातातेन मृतं तथा।।१६।।
ब्रह्मपुत्री पुरे जाता इहजन्मे सपत्नीकम्।
पूर्वे सबंधछेदस्य ब्रह्महत्यां करिष्याति।।१७।।
माहापापो पुरे जाता इहजन्मेदुःखदायकम् ।
पूर्व पापे विमुक्त्यर्थे फलं प्राप्नोति मुत्तम्।।१८।।
सुवर्णद्वयं देयंस्यात् धेनुमेकं संवत्सकम्।
ब्रह्मभोज्यं यथा शक्ति शिवपूजा च कारयेत्।।१९।।

सूर्यव्रतं षट्मासानि कर्तव्यं विधिपूर्वकम्।
ओदनैः शर्करादुग्धं भोज्यंते उभयोस्तथा ।। २० ।।
उमामाहेश्वरमेकं सुखसैय्या सदपात्रेणदापयेत्।
पिपलिकाषट्मासानि नित्यमेवकरिष्यति।। २१ ।।
कौशमाडं द्वादशश्चैव दातव्यं विधिपूर्वकम्।
एकद्रोणं च दातव्यं नित्यंफलानि समर्पयेत्।। २२ ।।
लक्षपूजा शिवकर्तव्यं वांछितंफलमुतमम्।
उदकं विप्रगृहेचैव षट्मासानि समर्पणम्।। २३ ।।
द्वौपुत्रौ पुत्रीमेकंस्यात् दीयंते शिवअर्चने।
ब्रह्मभोज्यंयथाशक्ति कुमारिका त्रयमेव च।। २४ ।।
पूर्वे प्रायश्चित् समोहंच धर्मामार्गेण शुद्धता।
ब्राह्मणाय यथाशक्ति दीयतेसद्पात्रकम्।।
पूर्व प्रायश्चित्य विमुत्यर्थं इहजन्मे वांछितं फलम्।। २५ ।।
गृहवित्तेनदातव्यं विश्वासेन सपत्निकम्।
यस्यभावो तस्यकुलंचैव वंशोवर्द्धतिसत् फलम्।। २६ ।।

**अरूणोवाच**

हे महामते। हे कश्यपसुत। हे महाबुद्धे। हे तेजोमय, हे दिवाकर पूर्वसंचित कर्म त्वं कथय।

**श्री सूर्योवाच।**

हे अरूण धनलग्नं प्रवक्ष्यामी तत् त्वया श्रोतव्यम्। नर्मदातीरे अति उत्तम धर्मपुरी ग्रामे ऋषिवल ज्ञातौ रोहिणी नक्षत्रे दानवीरस्यजन्मजातः। एक चक्षु तथा वामांगे लाच्छनवान् हरिभक्तोयं सदाचारी ललाटे गोपिचन्दनधारकः। वैरागी प्रसिद्ध वैष्णव हस्त तथा कर्णौ तुलसीधारकः आसीत्। सः मठमन्दीर चित्रशाला तथा स्वगृहे चतुर्भुज स्वमिनः सेवारतः आसीत्। तस्यगृहस्य चतुर्भुज मन्दीरे वहवदर्शार्थिनः प्रतिदिनं अगच्छन्तिस्य। तेषु दर्शनार्थिषु एका ब्राह्मणी पूर्वजन्म पापेन इह जन्मे द्वादशवर्षे विधवा जाता सा षोडशवर्षीया वैराग्यात् मायांप्रति आगता। तयासह कृतगमनात् अस्मिन् जन्मे सुखं नप्राप्यते। पञ्चगर्भपात एवं एक

SMT. HANSA MEHTA LIBRARY

बालहत्यानन्तरं विधवा गृहं त्यक्त्वा वणिक गृहे आगतवति। अतः तस्याः पिता महाक्रोधेन स्व उदरोपरि खड्गप्रहारं कृत्वा मृतः। ततः वणिकाय ब्रह्महत्यादोषः प्राप्तः। पश्चात स वणिकः ब्राह्मणीसह देशान्तरं कृतवान्। तथा तत्र विधवा पितुर्धनेन स्वजीवन व्यापनं रतः आस्तां। तदनन्तरं धर्मशालायम् निदमीतवन्तौ एकस्मिन् दिन स वणिकः विधवां त्यक्त्वा देशान्तरं कृतवान्। तथा विधवा पुत्रद्वयं प्रसवति। पञ्चवर्षानन्तरं सा मृत्युं प्राप्नोति। द्वौ पुत्रौ मातापितृ विहीनत्वात् दुःखी जातौ पूर्वजन्मेया ब्रह्मपुत्री आसीत् सा एवं इह जन्मनि पत्नीत्वेन प्राप्तः। पूर्व जन्मे सम्बन्धछेद तथा ब्रह्महत्या महापापात् अस्मीन् जन्मेदुःखदायकः।

अतः तस्य निवारणार्थं स्वर्णद्वयं दानं स्वत्सा धेनुदानं यथाशक्ति ब्राह्मणभोजनं तथा शिवपूजा कर्तव्या। षड्मास पर्यन्तम् विधिपूर्वकं सूर्यव्रतम् ओदन शर्करादुग्ध भोजनेन दम्पत्या करणीयम्। उमा महेश्वर पृत्यर्थं सत्पात्राय सुखशय्या देयम् षड्मासपर्यन्तम्। पिलिकाभ्यः भोजनं देयं। विधिपूर्वकं द्वादश कौशमाण्डं देयं। एकद्रोण परिमितं धान्यं तथा नित्यफलदानं देयं। वांच्छित फल प्राप्तयर्थं शिवपूजा एवं विप्रगृहे उदकदानं षड्मास पर्यन्तं कर्तव्यम्। तेन द्वौ पुत्रौ तथा एकाकन्याप्तिभविष्यति। पश्चात् यथाशक्ति ब्राह्मणभोजनं तथा कुमारीत्रय भोजनं कर्तव्यम्। पूर्वोक्तधर्ममार्गेण प्रायश्चितम् भवति। दानं सद्पात्र ब्राह्मणाय एवं दातव्यम्। पूर्व पापविमुक्त्या इह जन्मे वाच्छितं फलं प्राप्नोति। गृहवितेन यथाशक्ति येन भावेन दानं कृतं भवति। तदनुसार एव तद् कुलवंशयोः वृद्धि भवति तथा सत्फलं प्राप्यते।

**इतिश्री कर्मविपाके सूर्यार्णव संवादे धनलग्नं समाप्तमं।।**

**अथमकरलग्नफलम्**

**।। अरूणोवाच।।**

**सूर्यस्वामी महाबुद्धे जनानां हितकारकः।**
**पूर्वसंचितकर्माणिकथयं भो दिवाकर।। १।।**
**मकरलग्ने कथं स्वामि पूर्व संचित कर्मणि।**
**जनानां आधिव्याधिश्र्च कथं स्वामीदिवाकर।। २।।**

हे सूर्यस्वामि। हे महाबुद्धे। हे जनानां हितकारक भो दिवाकर। पूर्व

संचितकर्माणि कथय। हे दिवाकर मकरलग्ने जनाना आधिव्याधि तथा पूर्वसंचित कर्माणि कथय।

।। श्री सूर्योवाच ।।
पूर्वजन्मादिशाश्चैव हस्तिनापुरमुत्तमम् ।।
पूर्वेज्ञातितांबोलिश्च सौजन्यौ गृहमुत्तमम् ।। ३ ।।
लक्ष्मिसौख्यंसदानंदं सन्तानोसुबिद्धिदा।
पंचपुत्रसुतामेकं सुशीलोसकर्मकम् ।।४ ।।
अश्लेषां जायतेजन्मभ्रातृत्रयमेव च।
भार्यासुखंसंपूर्णं साधवीकुलोतमा ।। ५ ।।
रेवत्यांमातुजन्मस्य धर्म मार्गे सुशीलता।
पुत्रपौत्रादि सुखंतेन सपत्नी सुखदायकः ।। ६ ।।
कनिष्ठपुत्रो महादुष्टो च अरूच्यंमातृताातयोः ।।
पूर्वेजन्मे रोहण्यां कुलधर्मो च लोपयेत् ।। ७ ।।
भातृमध्ये महावैरो नित्यं कलह कारकम।
कुमारो कनिष्टस्यं भातृणांदुःखकारकम् ।। ८ ।।
को दिवसे पितानाशो मातुपश्चात् गमनमसह।
ज्ञाती भोज्येन कृतं बहुलं स्वज्ञाति सुखदायकम्।
एकादशेन मासेन नीलोत्सर्गंतुकारयेत् ।। ९ ।।
ब्रह्मभोज्यं विशेषेणक्रतव्यं सर्वभ्रातृकम्।
पश्चात् भ्रातृसर्वेण पृथकं च समाश्रयम् ।। १० ।।
कनिष्ठभ्राता महाक्रुरो ज्येष्ठभ्रात्रंनीकंदयेत् ।।
स्वयं हस्ते शीरछेदं च अपरभ्रातो विसर्जयेत् ।। ११ ।।
जेष्ठभ्राता माहासाधु धर्मिष्टश्च सुशीलता।
तस्य सन्तान द्वौपुत्रो च वर्षे द्वादश षोडश ।। १२ ।।
एकपुत्री ज्येष्ठ भ्रातु च सन्तानत्रयमेवच।
जेष्ठभ्रातु च पत्नी गत्वास्वामिसंनिधौ ।।
अग्निभक्षोक्रीयते साध्वी विशंतिवर्षैरद्वयम् ।। १३ ।।
तस्य उदरे गर्भोयं मासैसप्तदिनत्रयम्।

स्त्रीहत्या बाल हत्या च भ्रातृहत्यास्तथैव च।
सप्तजन्मनिलिप्यंते यावत चन्द्रदिवाकरौ।। १४।।
ज्ञातिसर्वे विशेषेण गृहमध्येन विसर्जयेत्।
धनं सर्वे गृहंम्लेच्छ शरीरेण दुःखदायकम्।। १५।।
पुरमध्ये जनासर्वे दुष्टकर्मोपि कथ्यते।।
स्वयंपुरं त्यजेत् पुरूषो गयायां च आगता।।
गयापुर स्थितोयेन वर्षैः सप्तद्वयं तथा।। १६।।
एकोपुत्र गयायां च तस्यगृहेन माश्रयम्।।
गयायाम् तु महासुखदा संतानोद्वयमेव च।। १७।।
जेष्ठपुत्रीमहत् तेजागौरवर्णासुकोमला।।
सप्तदशवर्षाणि चंचलापरिपूर्णता।। १८।।
तांम्बूलेन कर्तव्यं गंगातीरसमीपकम्।।
प्रातस्नान कृतेयेन नित्यकर्म समाचरेत्।। १९।।
एकोपिदिवसे निशायां ब्रह्मद्वारमागता।।
ब्रह्मपुत्रीकृतं स्नेहं क्वचित् वित्त समर्पणम्।। २०।।
धनानि पतितोस्त्री निर्लज्जा कर्मकारिणी।।
स्वयंस्वामी पुत्रमध्ये च दुःखं प्राप्नोति सर्वदा।। २१।।
तांबूलेन कृतं वाक्यंदुष्टकर्मणिकारयेत्।
महापापी दुराचारी इहजन्मे दुःखदायकम्।। २२।।
विप्रपत्नि हरेत दुष्टोपापिष्टोकर्मकारकः।।
निशायां गतोतिनां बगालपुरमुत्तमम्।। २३।।
तृतीयो वंशेति जीवितो पुरूषेणयूपदातकम्।
तस्यास्त्रियो पंचगर्भाणि हन्यते दुष्टकारकम्।। २४।।
पूर्वपत्नि हरेत् येन स्वधनेन च पूर्णता।।
स्वामीनं बहुधनं येन दुष्टनेन च समर्पणम्।। २५।।
पुरूषो ब्रह्मपुत्री च इहजन्मे सपत्नीकम्।।
इहजन्मे जनकोयेन पूर्व जनकबुद्धीदा।। २६।।
पंचहेमदातव्यं सवत्संधेनुमेकिकम्।।
ब्रह्मभोज्यं यथाशक्त्यं कारयेत्मनसोदयम्।। २७।।

द्वौदोणदानदातव्यं तथा।
उमामेकं च दातव्यं सुखसाध्यानि दापयेत्।। २८।।
भौमव्रतंषट्मासानित्रयोदश गौमुखानी।।
व्रतोयेनक्रतव्यं उभयोस्तथा।। २९।।
सवस्त्राणि देयंस्यात् सद्पात्रेण समर्पणम्।।
पूर्वकर्म विमुक्त्यर्थे इहजन्मेनशुद्धता।। ३०।।
द्वौपुत्र प्रसूतस्य पुत्रीमेकं सुखंभवेत्।।
पूर्वं प्रायिश्चत्मुक्त्यर्थं यथादानेनमुक्तयेत्।। ३१।।

श्री सूर्योवाच

पूर्वजन्मेहस्तिनापूरे तांबोलिज्ञातौ जन्मः ज्ञेय। लक्ष्मीवान् सदानन्दी-सौख्यवान् -सुबुद्धिदः सन्तानवान् सुशीलः सकर्मक सः पञ्चपुत्र तथा एककन्यावान् ज्ञेय। रोहिण्यां जात कनिष्ठ पुत्र महादुष्ट मातुतातयोः अरूचिकरः तथा कुलधर्मलोपकर्ता च ज्ञेया। अयं कनिष्ठ कुमारः भ्रातृणां कृते दुःखकारक-भ्रातृभ्य महावैरी तथा नित्यं कलहकारक आसीत्। एकस्मीन् दिने तस्य पितुः नाशः जात। अतः माता अपि सतीजात। तदनन्तरं एकादशे मासे नीलोर्त्सर्गं कृत्वा ज्ञाति भोजनं - ब्राह्मणभोजनं च कारयित्वा सर्वेभ्रातरः पृथक जातः। कनिष्ठभ्रातयो महाक्रूरः आसीत् तेन जेष्ठभ्राता तथा अपर भ्रातुः स्वहस्तेन शिरस्छेदनं कृतम्। जेष्ठभ्रातुः गृहे महासाध्वी सुशीलस्त्री तथा क्रमेण षोडश द्वादश वर्षियौ पुत्रौ तथा एकाकन्या अर्थात् सन्तानत्रय आसीत्। जेष्ठभ्रातुः पत्नी स्वभर्तासह अग्नीभक्षाजाता तथा च तस्याः उदरे सप्तमासोऽपरि दिनत्रयस्य गर्भः आसीत्। तदपि नाशः जातः अतः स्त्रीहत्या - वालहत्या तथा च भ्रातृहत्याया पापं सप्तजन्मपर्यन्तं लिप्यन्ते। तत् पापेन कनिष्ठ भ्रातुः ज्ञातौ गृहे च विर्सजनं जातम्। तस्य सर्वधनं म्लेच्छेन गृहीतंम्। शारीरिक दुःखमपि जातः। पुरमध्ये सर्वेजना तस्य दुष्टकर्म गाथां स्मारयन्तम् स्मः। अत सः पुरूषः देशान्तरं कृत्वा गयायां आगतः तत्र गयापूरे चतुर्दशवर्षपर्यन्तम् निवसितवान्। गयायां तस्यगृहे एकः पुत्र महासुखदः जात। तस्यजेष्ठपुत्री अपि गौरवर्णिया-सुकोमल- चंचला-सप्तदशवर्षिया आसीत्। तस्य गृहसमीपे गंगातीरे नित्यकर्म आचरणशीलः विप्रः आसीत्। एकस्मीन् दिने रात्रीकाले तेन ताम्बुलेन

विप्रपुत्र्याः सः स्नेहंकृत्वा वित्तसमर्पणं कृत्वा दुष्टकर्म कृतम्। तत्कर्म आपि तस्यकृते दुःखदायकः। तेन पापिष्ठेन तदनन्तरं एकस्मिन् निशायां विप्रपत्नीनासह देशान्तरं कृतम्। वगालपुरमागत तत्र तेन तस्याः सह दुष्टकर्मं कृत्वा पञ्चगर्भाणां हननमपिकृतम्। तया विप्रपत्न्या स्वामिणः वहुधनं अस्मै दुष्टाय दत्तम अतः सः दुष्टः धनवान् जातः। पूर्वजन्मे या ब्राह्मण पुत्री आसीत् सा एव इहजन्मे पत्नीत्वेन प्राप्ता।

अतः पूर्व जन्मकृत सर्वपाप क्षयार्थं पञ्च हेमानि, सवच्छाधेनु च दातव्या, यथा शक्ति ब्राह्मण भोजनं करणीयम्। द्रोणद्वयपरिमितिं धान्यं उमा प्रित्यर्थं एका सुख शय्यादानं च दातव्यम्। दम्पतिना षट्मास पर्यन्तं भौमव्रतं कृत्वा गोमुखे त्रयोदश ग्रास दातव्यम् पश्चात् सत्पात्राय वस्त्रदानं पूर्वकर्म विमुक्ति अर्थं देयं। तेन सः इह जन्मे शुद्धयति तथा च पुत्रद्वय एकापुत्रीच प्राप्नोति। एतावत् दानेन पूर्व प्रायश्चित मुक्तिद्वारा सुखी भवति।

**इतिश्री कर्मविपाके सूर्यारूणसंवादेमकरलग्नः समाप्तः।।**

**अथ कुम्भलग्नफलम्**

**अरूणोवाच**
**प्रवक्षे श्री सूर्यस्य कश्यपात्मजमहत्प्रभु।**
**पूर्वकर्मसंचितोयेनाकथयतु दिवाकर।। १ ।।**
**अरूणोवाच**
**हे दिवाकर कुम्भलग्नस्य पूर्वसंचित कर्माणि मे कथय।**
**।।श्री सूर्योवाच।।**
**कुम्भलग्नप्रवक्षामि श्रोतव्यम् अरूणस्तथा।**
**पूर्वकर्म विपाकेन कथं सूर्यमब्रवीत्।। २ ।।**
**पूर्वजन्मदक्षिणेयत् कर्णाटकेग्राममुतमम्।**
**विप्रज्ञाति तैलंग अधिकारो गृहमुत्तमम्।।**
**देशपांडोमहाशूरो धनसर्वाणिमुत्तमम।। ३ ।।**
**आर्द्राजन्मभे तस्य सौजन्यं सुखसंपदम्।।**

तस्य सन्तानो पुत्रमेकं गौरवर्णोसुबुद्धिदः ।। ४ ।।
एकसंतानपुत्रस्य कुलोद्धारणमेव च ।।
षोडशवर्षेणपुत्रस्य पाणिग्रहणमुत्तमम् ।।
जन्मतस्यरेवत्यां पतिव्रता सदैवतम् ।। ५ ।।
सप्तदशवर्षेपिता कष्टः मातुकष्टेन वंशति ।।
पुत्राभिघातो सिंहश्च उच्छगोमनसोचितम् ।। ६ ।।
पिताद्रव्यो समेहं च उच्छ गोलंपटस्तथा ।।
गृहेपत्नी विशालस्य पुरधृष्टेनकारयेत् ।। ७ ।।
स्वामिनेगृह विप्रस्य धनधान्यसमोहयम् ।।
तस्यपत्नीविशालस्य संतानेनकष्टदा ।। ८ ।।
वस्त्रभूषणविशेषेण कर्णाभर्णा कटिमेखला ।।
नासिकायां नुपुरं चैव नेत्रवाक्येन मुग्धता ।। ९ ।।
ज्ञातिगौडो स्त्रियोजाया तु तातसुखसंपदा ।।
देशपांड्योलं पटं चैव तेन धीरेणआगता ।।
स्वयंपत्निस्य ते दुष्टो बंधपाशेन कष्टदा ।।१० ।।
विप्रपत्नि गृहेचैव स्वयंस्वामी नित्यकर्मक
देवतार्चनेनकृत्यं विष्नुमुहूर्तेन अर्चयेत् ।।११ ।
परपूरूषेण कृतंप्राप्ति स्व स्वामिविप्र हन्यते ।।
निशायां शयनेजाते दुष्टेनशीरचछेदकः ।। १२ ।
विप्रतस्य मृतो स निशा पूर्णेन विक्रमम् ।।
उभयो शवगृहं येन कूपमध्ये समर्पणम् ।। १३ ।।
स्वगृहे कुपप्राग्नोयं स्व स्वामितस्य सर्मपणम् ।
निशामध्ये कृतं कर्म ब्रह्महत्यां करिष्यति ।।१४ ।।
निशायां घटिका पंच हरं द्रव्ये सर्वस्वंम्
सूर्योदय च गतं उभयो दुष्टकर्माणिकारयेत् ।। १५ ।।
मार्गेण उभयोजाता तस्करे गृह सर्वविप्रेण तस्यपत्निकम् ।
वनमध्ये गतोयेन सर्वस्वं हरेत् नरम् ।। १६ ।।
कोपिदिवसे मुक्तोयं उभयो विप्रपत्निकम् ।
पश्चिमे द्वारकादेशे आगताहिमद्वयम् ।। १७ ।।

गोमतीस्नानं कृतं येनां स्थिरं वर्षेण सप्तकम्।
गोमतिस्नानं कृतं येन नित्यकर्म समाचरेत्।। १८।।
पूर्वजन्मे पुत्रहीनस्य इहजन्मे दुःखदायकम्।
ब्रह्महत्या स्त्री हत्या च क्रियते विप्रहस्तयोः।। १९।।
पूर्वपापे समोहं च इहजन्मे च दुःखदा।
को दिवसे उभयोमृता इहजन्मे सपत्नीकम्।। २०।।
पूर्व पिता विप्रस्य इहजन्मे जनको भवेत्।
जन्म प्रायश्चित् कृतो येन इहजन्मे फलनाशकम्।। २१।।
त्रहहेमानि दातव्यम् वाच्छितं फलमुत्तमम्।
सदपात्रेण देयं स्यात् वंशोवर्धति निश्चयम्।। २२।।
सवत्स धेनु वैतर्णं दातव्यं मनसोचितम्।
ताम्रकलशं कर्तव्यम् फल घृतादि पूरितम्।। २३।।
द्वो हेमपत्नी च कर्तव्यं हेमपुरूषयोः।
द्वौ द्रोणादि दातव्यं उमामेकं च दापयेत्।। २४।।
ब्रह्मभोज्यं यथाशक्ति रूद्रपूजादि कारयेत्।।
लक्षपूजादिकं कर्तव्यम् विल्वपत्राणि समर्पणम्।। २५।।
कुमारिकात्रयभोज्यन्ते पञ्चवस्त्राणिदापयेत्।
आत्मवस्त्रशरीराणि विप्राणां च समर्पणम्।। २६।।
कौशमाण्डद्वादशश्चैव दातव्यं मनसोचितम्।
नर्मदायांस्नानं कृत्वा सवस्त्रं स्नानमेव च।। २७।।
उपवितोसुतामेकं च यथावित्तेन तथैव च।
गृहशाला वा तडागं च यथावित्तेन समर्पणम्।। २८।।
त्रयसन्तानादि प्राप्यन्ते यथा वित्तेन समर्पणम्।
पूर्वपापे समोहं च पुरूषो जायति सदाफलम्।। २९।।
पूर्वकर्मशुध्यर्थं इहजन्मे सुखसम्पदा।
धनधान्य पुत्रपौत्राणां वद्धते च निश्चितम्।। ३०।।

**श्री सूर्योवाच**

हे अरूण पूर्वकर्म विपाकेन कथं कुम्भलग्नं भवति तत् कथयामि। तत् त्वया श्रुतव्यम। इदं वाक्यं सूर्यः अब्रवीत्। पूर्वजन्मे दक्षिणस्याम् कर्णाटक ग्रामे उत्तम विप्र ज्ञातौ उत्तम गृहे तैलंग अधिकारित्वेन जन्मः ज्ञेय। तं देशपण्डितः महासूरः एवं च उत्तम धनसर्वादिभिः युतः ज्ञेय। तस्यगृहे सुखसम्पददाता संतानस्य जन्मः आर्द्रानक्षत्रे ज्ञेय। सः सन्तान गौरवर्णीय सुबुद्धिवान् ज्ञेयः। तस्य सन्तान्तस्य षोड्शेवर्षे पाणिग्रहणं तथा सप्तदशवर्षे माता पितृकष्टं ज्ञेयम्। तस्यसन्तानः सिंहसमानवीरः किन्तु लम्पटः पिताद्रव्यस्य नाशकर्ता तथा मनोचित कर्मरतः ज्ञेयः। तथाच तस्यपत्नी शरीरे सन्तानविषये अनेक विधानि कष्टानि आशन्। तथाऽपि तस्यपत्नी कर्णाभरण - कटीमेखला - नासिका- नेत्र वस्त्रभूषणादि अलंकारयुता तथा च मधूर वाची ज्ञेया। पर पुरूषेण कृतकर्मेण तेन दुष्टेन मध्यरात्रौ स्वजायायाः शिरस्छेदकृत तथा च उभयोः शवं गृहकूपे प्रक्षिप्तः।
तदनन्तरं तेन विप्रेण स्व स्वामिन धनं सर्वं हृतम। तथा च स्वामी पत्न्याः सहः दुष्टकर्मकृतम्। प्रातःकाले उभौ अपि धनं नीत्वा ग्रामं त्यक्तवन्तौ। किन्तु मार्गे एवं तस्करैः तेषां सर्वं धनं अपहृतम्। पश्चात बहुदिनान्तरं स विप्रः स्वामीपत्न्याः सह पश्चिम देशे द्वारकायां आगत। तत्र स्थिरोभूत्वा सप्तवर्ष पर्यन्तं गोमतिस्नानं तथा च नित्यकर्मं कृतम्। पूर्व जन्मस्य पुत्रहीनता इहजन्मे दुःखदायकः। पूर्वजन्मे कृत ब्रह्महत्या तथा स्त्री हत्यायाः पापमपि इह जन्मे दुःखदायकः तथा पूर्वजन्मे सम्मोहनभूता याः स्वामीपत्नी आसीत् सा एव इहजन्मनी पत्नीत्वेन वर्तते।

पूर्वपाप क्षयार्थं वांच्छितं फल प्राप्तये हेमत्रयाणि दातव्यम्। तेन निश्चयेन वंशवृद्धि भविष्यति। स वत्सा धेनु फलधृतादिभिःपूरितं ताम्रकलशं, द्वौ हैमीयपत्नी, एकः हेम पुरूषः, द्रोणद्वयपरिमित धान्यं, इत्यादि सुपात्राय ब्राह्मणाय देयम्। पश्चात् ब्राह्मण भोजनं यथाशक्तिकृत्वा रूद्रपूजां करणीया, लक्ष्यपूजा करणीया, विल्वार्पणम् करणीयम्। पञ्च वा त्रीणि कुमारी भोजयित्वा ताभ्यः वस्त्राणि दातव्यम्। विप्रेभ्यः वस्त्रदानं कर्तव्यम्। द्वादश कुशमाण्ड दानं कृत्वा सवस्त्रम् नर्मदास्नानं कर्तव्यम् । यथावित्तेन एकस्य विप्रस्य उपनयनम् वा तदर्थं धनं देयं तथा च कस्मैचित् गृह दानं वा तडागनिर्माणार्थे वित्तदानं कर्तव्यम् तेन पूर्वपाप नाशद्वारा

इहजन्मे सन्तानत्रय प्राप्तीः भवति। तथा निश्चयेन सुख सम्पदा धन धान्य पुत्रपुत्रौणां च वृद्धि भवति।

।। इति श्री कर्मविपाके सूर्यार्णव संवादे कुम्भलग्नं समाप्तम्।।

## अथमीनलग्नफलम्

अरूणोवाच
प्रत्यक्ष श्री सूर्यस्य वाच्छितम् फलमुत्तमम्।
जनानां पूर्वकर्माणि वक्तव्यं श्री दिवाकर।। 1।।
अरूणोवाच
हे दिवाकर जनानांपूर्वकर्माणि वाच्छितं उत्तमं फलं मे कथय।
श्री सूर्योवाच
मीनलग्नं प्रवक्ष्यामि श्रोतव्यं अरूणस्तथा।
पूर्वेदिशा पश्चिमे चैव जन्मभूमिश्र्च पोरवंदिरे।।
विप्रज्ञातिनांदश्र्च सौभाग्यो द्रव्यपूर्णता।। १।।
पूर्वजन्म अभिधानस्य स्वाति जन्मेन उत्तमम्।
शरीरे महापुष्टो गौरवर्णेनधीमता।। २।।
तस्य विप्रोमहाक्रोधी धन मदेन पूर्णतः।
व्यापारो दिशा सर्वे जनोऽपि सर्वाधितनताम्।। ३।।
नंदुआण इति ज्ञातिनां पंचैतेसुखदायकम्।
बहुमित्रो सुशीलस्य आत्मकर्मेण द्रव्ययम्।। ४।।
स्त्रीणंद्वयमारोग्यं स्वामिणं सुखदायकम्।
सन्तानं ज्येष्ठपत्नी च कनिष्टेन नपुत्रकम्।। ५।।
जेष्ठस्त्री अभिधानस्य मघायां जन्मुत्तमम्।
गृहशाला विशेषेण ग्रताये सुखसंपदम्।। ६।।
पुत्रनामैकुम्भश्र्च धीमानो बहुचंचलः।
पितापुत्रेण आनंद मातुसौख्यं सदाभवेत्।। ७।।

सप्तदश वर्षाणि पुत्रस्य पितायं कष्टमेव च ।
पिताद्रव्येण सम्पूर्णं व्यापारो वहुलं कृतम्।। ८।।
स्वयंस्त्री पतिव्रता चैव धर्ममार्गेण तत्फलम्।
चतुर्विंशति वर्षेण स्वमातामरणं ध्रुवम्।। 9।।
अपरमाता गृहेचैव विरोधं कारयेत् नरः।
बहुदिवसानि क्रोधस्य अपरमाता नपुत्रकः।। 10।।
एकोऽपि दिवसे पुत्रो अपरमातानीकंदनम्।
खड्गेन शिरच्छेदस्य मरणप्राप्ति सद्ययः।। ११।।
स्त्रीहत्यायुगमेकं च ब्रह्महत्या युगद्वयम्।
बालहत्या त्रययुगंम् गौ हत्या च चतुर्युगम्।। १२।।
धनं सर्वगृहेम्लेछैबंधनं सप्तमासकम्।
स्वयंस्त्रि प्ररहर्ता च ज्ञातिमध्ये विसर्जनम्।। १३।।
महादुष्टो कृतं सर्वे स्वजनेन वहुवैरिणम्।
नगरमध्ये जनैः सर्वैः दुष्टकर्म समाचरेत्।। १४।।
संग्रामो त्येजत् विप्रो कोऽपि देशान्तरे गतः।
वाराणस्यां गतो ये न स्नानं दानेनपूर्णता।। १५।।
गंगास्नानं पंचवर्षस्य स्वयं विप्रेणकारकः।
पुरमध्ये ब्रह्मचारी च विप्रेणसुखसंपदः।। १६।।
द्रव्येणसुखदो येन एकाकि मठसून्दरम्।
तस्याश्रयोविप्रेण पश्चिमायांतिमागता।। १७।।
मठमध्ये ब्रह्मचारि च मैत्रि तेनापिकारयेत्।
द्रव्य सर्वेण ब्रह्मचारि च गृहित्वा विप्रेण सर्वयम्।। १८।।
तस्यविप्रेण कृतंकर्म हन्ति ब्रह्मचारिणम्।
खड्गेन शिरच्छेदनं दुष्टकर्म समाचरेत्।। १९।।
धनसर्वगृहं तेन गंताव्यां मध्यरात्रिकम्।
स्वयंदेशे आगतो विप्र स्वयंग्रामेणमाश्रयम्।। २०।।
ग्राममध्ये सूचीकारस्य सौभाग्यो सुखसम्पदः।
तस्यपुत्री विधवायां गौरवर्णेण मुत्तमम्।। २१।।

षोड्शवर्षेण पुत्री च कटिकटाक्षेण चंचला
तस्यगृहे विप्रोयं निशायां च समागतः ।। २२ ।।
वहूलक्ष्मी पुत्राणां दुष्टकर्म च कारकः ।
विप्र गृहे सूची पत्नी च ज्ञातिमध्ये विसर्जनम् ।। २३ ।।
ब्रह्मपुत्र सूची पुत्री उभयो स्वयं आत्मिकम् ।
सूची हस्ते धनं सम्पूर्ण गृहिवापि तया स च ।। २४ ।।
तस्यउदरे द्वौपुत्रस्य नेत्रहीनेन मेकिकम् ।
उत्तरदेशे विप्रोयं व्यापारेण कृतं भवेत् ।। २५ ।।
मार्गेण तस्करोयेन ग्रहणम् वस्त्राणि सर्वयम् ।
उदरे खड्ग स्वयंहस्ते प्राणान्त्यजति सद्ययम् । २६ ।।
सपत्नीको वृषे जाता मरणं प्राप्ती क्षयीस्तथा ।
पश्र्चात् द्वौ पुत्रेण एकोदिवसांतरेगता ।। २७ ।।
इहजन्मे सूचीपत्नी च पूर्वकर्मेण संचिता ।
हेमानी त्रय दातव्यम् च शास्त्रमार्गेण कारयेत् । । २८ ।।
सवत्सधेनुपलिास्तु स्वहस्ते या च एकिकम् ।
द्रोण एकं च दातव्यम् भौमव्रतानिकारयेत् ।।
षट्मास व्रतं भौमस्य क्रतव्यं शुचिदेहिकम् ।। २९ ।।
ब्रह्मभोज्यं यथाशक्त्यं मनसोचितेनकारयेत् ।
कुशमाण्डानि च सप्तैव सदपात्रेण च दापयेत् ।। ३० ।।
उभयो वस्त्रदातव्यम् संध्यास्नान समाचरेत् ।
नित्यफलानि च दातव्यम् विप्राणां च समर्पणम् ।। ३१ ।।
द्वौ पुत्रौ च सुखंयेन वंशोवर्धति निश्चयम् ।
ताम्रघट कर्तव्यं घृततैलेनपूरितम् ।। ३२ ।।
सद्पात्रेण दातव्यं वाच्छितम् पुत्रपौत्रयोः ।
एवं कथयति श्रीसूर्य मीनलग्नमनुत्तमम् ।। ३३ ।।
पूर्व संचित कर्माणि कथितानि प्रयत्नतः ।
एवं कृतेन पुण्येन सुख प्राप्तिन संशय ।। ३४ ।।

श्री सूर्योवाच

हे अरूण मीन लग्नस्य पूर्वकर्माणि कथयामि तत् त्वया श्रुतव्यम्। पूर्वकाले पश्चिमदेशे पुरबंदिरे विप्रज्ञातौ सौभाग्येन द्रव्यपूर्ण गृहे जन्मः ज्ञेयः। पूर्वजन्मे उत्तमे स्वातीनक्षत्रे अस्य महापुष्ट शरीरस्य गौरवर्णीयस्य जन्मः ज्ञेय। सःधीमान विप्रः महाक्रोधि तथा च धनमदेन पूर्णः आसीत्। तस्य व्यापारः सर्वाषु दिशाषु प्रसरितः तथा च सर्वजनेषु तस्य आधीनता आसीत्।

स विप्रः वहुमित्रयुतः सुशीलः तथा आत्मकर्मेण द्रव्य अर्जनशीलः आसीत्। तस्यगृहे सुखदायिका पत्नीद्वयं आसीत्। जेष्ठपत्नीतः सन्तानमेक तथा च अपर पत्न्याः कोऽपि सन्तानः नासीत्। जेष्ठ पत्न्याजनित पुत्रस्य जन्मः उत्तमे मघानक्षत्रे आसीत्। सः अपि गृहशाला इत्यादिभिः विशेषरूपेण सुखसम्पत्तियुतः आसीत्। सः धीमान् चंचलः तथा मतापित्र्योः सुखयुतः आसीत्। स पुत्रः सप्तदशवर्षे पिता कष्टं प्राप्तवान तथा ऽपि पितुः सम्पूर्णद्रव्येण वहुव्यापार कृतवान्। तथा च धर्ममार्गेण पतिव्रता अपि प्राप्तवान्। चतुर्विंशति वर्षे तस्य मातुः मरणं जातम्। तत् पश्चात अपूत्रीय अपरमाता गृहे तस्य वहुविरोधं कृतवान्। वहु दिन पर्यन्तम् अपरमातुः क्रोधयुक्त विरोधेन संन्त्रस्तः।

अयं विप्रः एकस्मीन् दिने खड्गेन अरमातुः शिरस्छेन्दं कृतवान्। तस्य सर्वधनं म्लेच्द्देगृहितम् तथा सप्तमासपर्यन्तम् सःबन्दी आशन्। तस्य स्त्री अपि परपुरूषेण भ्रष्टाः कृता। अतः ज्ञाति मध्ये विसर्जनं जातम्। तेन महादुष्टेन स्वजनैः सह वहुवैरम् कृतम् । नगरमध्ये तस्यख्याति महादुष्टेन जाता। अतः तेन स्वग्रामं त्यक्तम् तथा देशान्तरं कृत्वा वारणास्यां आगत। तत्र गंगास्नान दानादि कर्मं च पञ्चवर्ष पर्यन्तम् कृत्वा पूरमध्ये ब्रहमचारित्वेन ख्याति प्राप्तवान्। तत्र एकस्मीन् मठे एकः ब्रह्मचारी आसीत् तेन अस्मै आश्रयं दत्तः पश्चात तेन् मठमध्ये ब्रह्मचारिण सह मैत्री कृता तथा च तस्य सर्वं द्रव्यं नित्वा खड्गेन ब्रह्मचारिणः शिरस्छेदेनकृतम्। तदनन्तरं मध्यरात्रौ सः विप्रः स्वग्राम आगत। ग्राममध्ये सुखसम्पदयुत सुचीकारस्य गौरवर्णीया षोडश वर्षीया कटिकटाक्षेण चंचला पुत्री आसीत्। मध्यरात्रे एषः विप्रः तस्यगृहं आगत। दुष्टकर्मं च कृतम् । तया सह पाणिग्रहणमपि कृतम् विप्रग्रहे सुचिपत्नीत्वात् ज्ञातिमध्ये पुनः

विसर्जनम् जातम्। सुचिकारस्य सर्वंधनम् हरित्वा सूचिपुत्री विप्राय दत्तवति तथा व्यापारार्थे उत्तरदेशे प्रेषितवति। तत्काले तस्योदरे पुत्रद्वयं एकः नेत्रहीनं आसीत्। व्यापारार्थे गतः विप्रस्य सर्वं धनं वस्त्राणि च मार्गे एव तस्करैः गृहितम् तथा तस्यहत्या कृता। सूचिपुत्री अपि क्षयरोगेण मरणं प्राप्तवति। तस्याः पुत्रद्वयम् केचन दिवसान्तरे एव मृता। पूर्वजन्मे याः सूचीपूत्री सा एव इह जन्मे पत्नीत्वेन वर्तते।

अतः तेन पापमुक्तये हेमानि त्रय, सवत्सा कपिला धेनु, षड्मास पर्यन्तम् भौमव्रतं कर्तव्यम्। पश्चात यथाशक्ति ब्राह्मणभोजनकारयित्वा सप्तकुशमाण्डानि सत् पात्र ब्राह्मणाय देयम् उभयोः वस्त्रदानंकृत्वा सन्ध्यास्नानादि कर्मकरणीयम् ब्राह्मणाय नित्यफलदानं देयम् तेन निश्चयेन पुत्रद्वयस्य उत्पत्तित्वात् वंशवृद्धि भवति। घृततैलपूरित ताम्रघटः सत्पात्रायदानेसति वांच्छितं पुत्रपौत्रादि प्राप्तिर्भवति। हे अरूण मया प्रयत्नेन पूर्व संचितकर्माणि त्वया कथितानि एवं पुण्यकर्मेण सुख प्राप्ति भवति। तत्र न कोऽपि संशय।

**। इति श्री कर्मविपाके सूर्यारूण संवादे ज्ञानभास्करेण लग्नाध्याय सम्पूर्णः।। श्री रस्त।। अरीभः।।**